रङो विः सुपि ॥ ११० ॥

रङो विः स्यात् सुपि परे । न त्वन्यरेफस्य । चतुर्षु ।

प्रियचत्वाः । हे प्रियचत्वः । प्रियचत्वारौ । प्रियचत्वारः । प्रियचत्वारम् । प्रियचत्वारौ । प्रियचतुरः । प्रियचतुरा । प्रियचतुर्भ्यामित्यादि ।

नसब्महद्भ इति र्घत्वे नो लुप् । राजा । हे राजन् । राजानौ । राजानः । राजानम् । राजानौ । अनो ऽल्लोपः । राज्ञः । राज्ञा । राजभ्यामित्यादि । ङौ राज्ञि । राजनि ।

अम्बस्यादित्युक्तेः । ब्रह्मणः । यज्वनः । इत्यादि । शेषं राजवत् ।

हन्पूषार्यमेनो ऽधौ सौ शौ र्घः ॥ १११ ॥

एषां र्घः स्याद् अधौ सौ परे शौ च । वृत्रहा । हे वृत्रहन् । वृत्रहणौ । वृत्रहणः । वृत्रहणम् । वृत्रहणौ ।

हनो ह्नो घ्नो न णः ॥ ११२ ॥

हनस्थाने जातस्य ह्नस्य घ्नः स्यात् । तस्य च नस्य णो न स्यात् । वृत्रघ्नः । वृत्रघ्ना । वृत्रहभ्यामित्यादि । एवं पूषन्अर्यमन्शार्ङ्गिन्यशस्विन्प्रभृतयः ।

पूष्णो ङिर् ङिर् वा ॥ ११३ ॥

पूषि । पूष्णि । पूषणि ।

मघोनस् तुङ् वा क्तिप्योः ॥ ११४ ॥

मघवन्शब्दस्य तुङ् वा स्यात् क्तौ पौ च परे । उङाव् इतौ ।

विदचो ऽद्वेर् नुण् घौ ॥ ११५ ॥

उकारेत ऋकारेतो ऽचश्च नुण् स्याद् घौ परे । न तु द्वेः ।

स्यान्तस्याराल् लुप् फे ॥ ११६ ॥

स्यस्यान्तस्य लुप् स्यात् फे परे । न तु रात् परस्य । मघवान् । मघवा ।
हे मघवन् । मघवन्तौ । मघवानौ । मघवन्तः । मघवानः । मघवन्तम् ।
मघवानम् । मघवन्तौ । मघवानौ । मघवतः ।

श्वयुवमघोनाम् उर् वो ऽते पौ ॥ ११७ ॥

एषां वशब्दस्य उः स्यात् पौ परे । न तु ते । मघोनः । मघवता । मघो-
ना । मघवद्भ्याम् । मघवभ्यामित्यादि ।
शुनः । शुना । यूनः । यूना । इत्यादि । शेषं राजवत् ।
अर्वा । हे अर्वन् ।

अर्वणो ऽनजम् तुङ् त्ये ऽसौ तु ॥ ११८ ॥

नज्वर्जस्यार्वणो नस्य तुङ् स्याद् असौ त्ये परे । अर्वन्तौ । अर्वन्तः । अ-
र्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्यामित्यादि । अनजः किम् ।
अनर्वा । हे अनर्वन् । अनर्वाणौ । अनर्वाणः । शेषं यज्ववत् ।

पथिमथ्यृभुक्षां थितोर् नमौ घौ ॥ ११९ ॥

पथिन् मथिन् ऋभुक्षिन् एषां थस्य नम् स्यात् । इकारस्य च अकारः ।
घौ परे ।

टेर् आ सौ ॥ १२० ॥

पथ्यादीनां टेर् आ स्यात् सौ परे । पन्थाः । हे पन्थाः । पन्थानौ ।
पन्थानः । पन्थानम् । पन्थानौ ।

लोपो ऽच्यश्वौ ॥ १२१ ॥

पथ्यादीनां टेर् लोपः स्याद् अघ्राव् अचि परे । पथः । पथा । पथिभ्या-मित्यादि । एवं मन्थाः । ऋभुक्षाः ।

ष्णतिसंख्याया इति पञ्च २ । पञ्चभिः । पञ्चभ्यः २ ॥

नो नामि घः ॥ १२२ ॥

नान्तस्य नामि परे घः स्यात् । पञ्चानाम् । पञ्चसु ।

वाष्टनो जस्शसोर् डौः ॥ १२३ ॥

अष्टनः परयोर् जस्शसोर् डौः स्याद्वा । ड इत् । अष्टौ । अष्ट । अष्टौ । अष्ट ।

डा झौ वा ॥ १२४ ॥

अष्टनो डा स्याद्वा झौ परे । ड इत् । अष्टाभिः । अष्टभिः । अष्टाभ्यः । अष्टभ्यः । अष्टाभ्यः । अष्टभ्यः । अष्टानाम् । अष्टासु । अष्टसु ।

धोर् मो नः पम्वि ॥ १२५ ॥

धोर् मस्य नः स्यात् पे मे वे च परे । प्रशान् । प्रशानौ । प्रशानः । प्रशानम् । प्रशानौ । प्रशानः । प्रशाना । प्रशान्भ्यामित्यादि ।

इदमो ऽयम् इयं पुंस्त्रियोः सौ ॥ १२६ ॥

इदमः पुंलिङ्गस्त्रीलिङ्गयोः क्रमेण अयमियमौ स्तः सौ परे । अयम् ।

द्वो मो ऽदसश्च झौ ॥ १२७ ॥

इदमो ऽदसश्च दस्य मः स्यात् झौ परे । इमौ । इमे । इमम् । इमौ । इमान् ।

टौसोद्मो ऽनको ऽनः ॥ १२८ ॥

अनक इदमष् टौसोः परयोर् अनः स्यात् । अनेन ।

स्भ्य् अः ॥ १२९ ॥

अनक इदमो ऽः स्यात् से भे च परे । आ झिलभत्वि । आभ्याम् ।

नित् भिसो ऽदसश् च ॥ १३० ॥

अनकः इदमो ऽदसश् च परस्य भिसो भिस् एव स्यात्। न त्व् ऐस्। एभिः। अमीभिः। टेरवे दस्य मत्वे ङे स्मै पश्चाद् अः। अस्मै। आभ्याम्। एभ्यः। अस्मात्। आभ्याम्। एभ्यः। अस्य। अनयोः। एषाम्। अस्मिन्। अनयोः। एषु। अनकः किम्।

त्यादिव्यासभोसन्तिमिश्रेर् वाक् प्राक् टेर् व्यक दश् च ॥ १३१ ॥

त्याद्यन्तस्य व्यस्य सभश्रोसवर्जन्तिमन्तश्रेः श्रेश् च टेः पूर्वो ऽक् स्याद्वा। व्यकस्य दश् च। इमकेन। इमकाभ्याम्। इमकैरित्यादि।

द्वोटौसोरेतयोर् एनो ऽनूक्तौ ॥ १३२ ॥

द्वौ टौसोश्च परत इदमेतदोर् इदेतयोर् एनः स्यादुक्तस्य पश्चादुक्तौ।

इमं विद्धि ह्ररेर्भक्तं विद्धयैनं शिवार्चकम्।
इमाविनान्वित शैवानेनाधेनान्तु वैजवान् ॥
अनेन पूजितः कृष्णो ऽथैनेन गिरिशो ऽर्चितः।
अनयोः केशवः स्वामी शिवः स्वामी अथैनयोः ॥

त्यदौ टेः सौ। कः। कौ। के। इत्यादि सर्ववत्।

वल्मीत्येति वस्य भः। भुत्। भुद्। भुवौ। भुवः। भुवा। भुद्भ्यामि-त्यादि।

युजिरो ऽसौ नुम् घौ ॥ १३३ ॥

युजिरो युजूशब्दस्य नुम् स्याद् घौ परे। न तु से।

च्वश्चक्रुचुक्त्विग्दिगसृक्ष्तिकृदन्तवृत्दक्स्पृक्स्नुगुष्णिहां कङ् भौ ॥ १३४ ॥

चवर्गान्तानाम् अचादीनां च कङ् स्याद् भौ परे।

अौ ऽच्यदान्ते। जपे जन्नोः। स्यात्तस्याभ्लुप्के। युङ्। युञ्जौ। युञ्जः। युञ्जम्। युञ्जौ। युञ्जः। युजा। युग्भ्यामित्यादि। अन्ये किम्। सुयुक्। सुयुजौ। सुयुजः। इत्यादि। युजिरः किम्। युक् समाधिनाम्।

अञ्चुक्रुञ्चयुजामेव प्राक् कङ् पृथग्ग्रहणात् । तेन खन् । खञ्जौ । खञ्जः । इत्यादि ।

शच्छाजेति षङ् । षो डः फे । राट् । राड् । राजौ । राजः । एवं विभ्राट् । देवेट् । परिव्राट् । विश्वसृट् । परिमृट् ।

विश्वराजो ऽद् आ ॥ १३५ ॥

विश्वराजो ऽकारस्य आः स्याद् भौ परे । विश्वाराट् । विश्वाराड् । विश्वराजौ । विश्वराजः ।

स्यादेः सो लोपः को ऽषढन्यरक्षः ॥ १३६ ॥

स्यादौ स्थितस्य सस्य लोपः स्याद् भौ परे । कस्य च । न तु षढाभ्यामन्यस्य स्थाने जातस्य रक्षश्च । भृट् । भृड् । झषझसोरिति सस्य दः । स्तु श्चुभिः श्चुशादिति । भृज्जौ । भृज्जः । इत्यादि ।

ऊर्क् । ऊर्ग् । ऊर्जौ । ऊर्जः । इत्यादि ।

अवयाः । हे अवयाः । हे अवयः । अवयाजौ । अवयाजः । अवयोभ्यामित्यादि ।

त्यदां तदोः सः सौ ॥ १३७ ॥

त्यदादीनां तदयोः सः स्यात् सौ परे । स्यः । त्यौ । त्ये । इत्यादि सर्ववत् । एवं तद् । एषः । एतौ । एते । इत्यादि । द्वीटौसीदैतयोरेनो ऽनूक्ताविति प्रयोगस्तु इदम्वत् ।

युष्मदस्मदोस् त्वाहौ युवावौ यूयवयौ त्वन्नदौ तुभ्यमह्यौ तवममौ सिद्वजस्क्वङेङस्सु ॥ १३८ ॥

अनयोः क्रमादेत आदेशा एषु परेषु क्रमात्स्युः ।

ङेघ्योर् मः ॥ १३९ ॥

युष्मदस्मद्भ्यां परस्य ङे इत्यस्य घेश् च मः स्यात् । त्वम् । अहम् ।

सभनौघ् आङ् ॥ १४० ॥

युष्मदस्मदोर् आङ् स्यात् से भे ऽनि औकारे च परे । ङ इत् । युवाम् । आवाम् । यूयम् । वयम् । त्वाम् । माम् । युवाम् । आवाम् ।

शस्भ्यस्ङसिभ्यस्ङस्सामां नडभ्यन्ततडाकनः ॥ १४१ ॥

युष्मदस्मद्भ्यां परेषामेषां स्थाने न डभ्यन् त त ड आकन् एते क्रमात्स्युः । ड इत् । युष्मान् । अस्मान् ।

एङ् टाड्यानि ॥ १४२ ॥

युष्मदस्मदोर् एङ् स्याट् टाड्योः परयोर् आनि च । ङ इत् । त्वया । मया । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः । तुभ्यम् । मह्यम् । युवाभ्याम् । आवाभ्याम् । युष्मभ्यम् । अस्मभ्यम् । त्वत् । मत् । युवाभ्याम् । आवाभ्याम् । युष्मत् । अस्मत् । तव । मम । युवयोः । आवयोः । युष्माकम् । अस्माकम् । अतित्वयाम् । अतिमयाम् । अतियुवयाम् । अत्यावयाम् । अतियुष्मयाम् । अत्यस्मयाम् । द्व्यद्वयोरर्थस्यापि ग्रहणादेवं सर्वत्र । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ।

द्वीचीषीणां द्यौर् द्वैर् व्वैस् ते मे वां नौ वस्नसौ वा पादवाक्यादाव् अचवाहाहैवादृग्दृश्यर्थैस् त्वा मा त्व् अमा ॥ १४३ ॥

युष्मदस्मदोर् द्वीचीषीणां द्यौः सहितयोस् ते मे । द्वैर् वां नौ । व्वैर् वस्नसौ क्रमाद्वा स्यातान् । अमा युक्तयोस्तु त्वा मा । न तु पादस्य वाक्यस्य चादौ स्थितयोः । न चवाद्यैरदर्शनार्थदृश्यर्थधुभिश्च योगे ।

दानोदरस्त्वावतु मापि मित्र
ददातु ते मे ऽपि मुदं मुकुन्दः ।

निहन्तु ते विष्णुरघानि मे ऽपि
रक्षत्वसौ वामपि नौ मुरारिः ॥
ददातु वां नावपि शर्म कृष्णः
करोतु वां श्रीदयितो दयां नौ ।
पुष्णातु वो नो ऽपि हरिर्धनं वो
ददातु नो हत्वशुभानि वो नः ॥

अपादवाक्यादौ किम् ।

युष्मानवत्वविरतं कृष्णो ऽस्मान्पातु शंकरः ।

अचादियोगे किम् ।

तुभ्यं मह्यं च दद्यात्स्वं गोविन्दो मह्यमेव शम् ।
श्रीकण्ठो मामुपेक्ष्य त्वामालोकयति पूजकम् ॥

सदानूक्ते ऽसादिप्र्याः ॥ १४४ ॥

अनयोरन्वादेश एत आदेशा नित्यं स्युः । न तु सपूर्वात् प्रत्यन्तात् परयोः ।

यूयं वयं विनीतास्तत्पातु वो नो महेश्वरः ।
यूयं वयं हितास्तेन सो ऽस्मान्पातु स वः शिवः ॥

नाविशेष्यान्याद्यामन्त्र्यात् ॥ १४५ ॥

विशेष्यपूर्वमनामन्त्र्यपूर्वं च हित्वान्यस्मादामन्त्र्यादेते न स्युः ।

शंभो ऽस्माव्रक्ष लक्ष्मीश सेव्य नो ऽवाव शर्व नः ।

सुपात् । सुपादौ । सुपादः । सुपादम् । सुपादौ ।

पात् पत् पौ ॥ १४६ ॥

पादः पत् स्यात् पौ परे । सुपदः । सुपदा । सुपाद्भ्यामित्यादि ।

च्वङिति कङ् । नस्य नुः । नोर् ङः । स्यान्तस्य लुप् । प्राङ् । प्राञ्चौ ।
प्राञ्चः । प्राञ्चम् । प्राञ्चौ । एवं क्रुञ्चतिर्यञ्चोदञ्चादयः ।

अचो ऽल्लोपो घश् च ॥ १४७ ॥

अचो ऽकारस्य लोपः स्यात् पौ परे । पूर्वस्य च र्घः । प्रतीचः । प्रतीचा । प्रत्यग्भ्यामित्यादि ।

तिर्यगनुनुयगदनुयगुदचां तिरश्च्अनुनुईच्अदनुईच्उदीचः ॥ १४८ ॥

एषामेते क्रमात्स्युः पौ परे । तिरश्चः । तिरश्चा । तिर्यग्भ्यामित्यादि । अनुनुईचः । अनुनुईचा । अनुनुयग्भ्यामित्यादि । एवमदनुयङ् । उदीचः । उदीचा । उदग्भ्यामित्यादि । शेषं पूर्ववत् ।

शच्छ्राजेति चस्य षत्वे तद्निमित्तस्य शस्य सत्वे स्यादेः सो लोपः । सुवृट् । सुवृड् । सुवृश्चौ । सुवृश्चः । सुवृड्भ्यामित्यादि ।

नसब्महद्भ इति र्घः । स्यान्तस्य लुप् । महान् । महान्तौ । महान्तः । महान्तम् । महान्तौ । महतः । महता । महद्भ्यामित्यादि ।

भवन् । भवन्तौ । भवन्तः । भवन्तम् । भवन्तौ । भवतः । भवता । भवद्भ्यामित्यादि । शेषं महद्वत् ।

अत्वसो ऽधोरिति श्रीमान् । शेषं भवद्वत् । एवं यशस्वदादयः ।

भगवदघवद्भवतां भगो अघो भो वा धौ ॥ १४९ ॥

एषामेते क्रमात्स्युर्वा धौ परे । हे भगोः । हे भगवन् । हे अघोः । हे अघवन् । हे भोः । हे भवन् । शेषं श्रीमद्वत् ।

अद्वेरित्युक्तेर्न नुण् । ददत् । ददतौ । ददतः । इत्यादि ।

शच्छ्राजेति षङ् । षो डः फे । विट् । विड् । विशौ । विशः । विशम् । विशौ । विशः । विशा । विड्भ्यामित्यादि ।

मुहां घङिति नक् । नग् । नट् । नड् । नशौ । नशः । नशम् । नशौ । नशः । नशा । नग्भ्याम् । नड्भ्यामित्यादि ।

श्वेतवाहेति डसङ् । पुरोडाः । हे पुरोडाः । हे पुरोडः । पुरोडाशौ । पुरोडाशः । पुरोडोभ्यामित्यादि ।

चुङिति कङ् । स्पृक् । स्पृग् । स्पृशौ । स्पृशः । स्पृशा । स्पृग्भ्यामित्यादि । दधृक् । दधृग् । दधृषौ । दधृषः । दधृग्भ्यामित्यादि ।

षट् । षड् । षड्भिः । षड्भ्यः । षण्णाम् । षट्सु ।

सषेस्डसस्सजुषह्नां रङ् पे ऽन्तः ॥ १५० ॥

सस्य स्थाने जातस्य षस्य इस्डसः सजुषो ऽह्नश्च रङ् स्यात् पे परे । न तु जातस्य ।

र्व्य् अनच्तपोक्को धो र्वी ऽकुर्छुरो ऽन्तेः ॥ १५१ ॥

धोरिको र्घः स्याद् वि रेफे च । न तु कुर्छुरोर् न च खेर् नाचि तपे च । पिपठीः । पिपठिषौ । पिपठिषः । पिपठीर्भ्याम् । पिपठीःषु । एवं चिकीर्षादयः ।

दोः । दोषौ । दोषः । दोषम् । दोषा । पाद्दन्नोति दोषन् वा । दोष्णः । दोष्णा । दोर्भ्याम् । दोषभ्यामित्यादि ।

स्यादेः सो लोपः । विविट् । विविड् । विविक्षौ । विविक्षः । विविड्भ्यामित्यादि । पिपक् । पिपग् । पिपक्षौ । पिपक्षः । पिपग्भ्यामित्यादि । एवं गोरग्दिधक्षादयः ।

सुपीः । सुपिसौ । सुपिसः । सुपीर्भ्याम् । सुपीःषु । एवं सुतूः ।

विद्वान् । हे विद्वन् । विद्वांसौ । विद्वांसः । विद्वांसम् । विद्वांसौ ।

वसोर् वः सेम् अप्य् उर् मतुप्योः ॥ १५२ ॥

वसोर् वशब्द इम्सहितो ऽपि उः स्याद् मतौ पौ च परे । विदुषः । विदुषा । स्रसध्वस्वस्वित्वति दङ् । विद्वद्भ्यामित्यादि । पेचिवान् । पेचिवांसौ । पेचिवांसः । पेचिवांसम् । पेचिवांसौ । पेचुषः । पेचुषा । पेचिवद्भ्यामित्यादि । जगन्वान् । जगन्वांसौ । जगन्वांसः । जगन्वांसम् । जगन्वांसौ । वमोरिति तन्निमित्तस्य नस्य मत्वे ।

हनगमजनखनघसाम् उङ्लोपो ऽङे ऽच्य् अणौ ॥ १५३ ॥

एषाम् उङ्लोपः स्याद् अणाव् अचि । न तु ङे । जग्मुषः । जग्मुषा ।
जगन्वद्भ्यामित्यादि । एवं जग्मिवान् ।
अधोरित्युक्तेः । सुहिन् । सुहिंसौ । सुहिंसः । सुहिन्भ्याम् ।
ध्वत् । ध्वसौ । ध्वसः । ध्वद्भ्याम् । एवं स्रत् ।
उक्थशाः । हे उक्थशाः । हे उक्थशः । उक्थशासौ । उक्थशासः ।
उक्थशोभ्याम् ।

पुंसो ऽसुङ् घौ ॥ १५४ ॥

पुंसो ऽसुङ् स्याद् घौ परे । उङाव् इतौ ।
पुमान् । हे पुमन् । पुमांसौ । पुमांसः । पुमांसम् । पुमांसौ । पुंसः ।
पुंसा । पुम्भ्यामित्यादि ।

सेर् डोशनस्पुरुदंशो ऽनेहसो ऽधेः ॥ १५५ ॥

एभ्यः परस्य सेर् डा स्यात् । न तु धेः । उशना ।

धेर् डडनौ वोशनसः ॥ १५६ ॥

उशनसः परस्य धेर् डडनौ वा स्तः । ड इत् । हे उशन । हे उशनन् ।
हे उशनः । उशनसौ । उशनसः । उशनसा । उशनोभ्यामित्यादि ।
अनेहा । हे अनेहः । अनेहसौ । अनेहसः । अनेहोभ्यामित्यादि । एवं
पुरुदंशा ।
वेधाः । हे वेधः । वेधसौ । वेधसः । वेधसा । वेधोभ्यामित्यादि ।
अधोरित्युक्तेः । सुवः । सुवसौ । सुवसः ।

अदसः सेर् औः ॥ १५७ ॥

अदसः परस्य सेर् औः स्यात् । असौ ।

मात् स्वर्घाव् उऊ ॥ १५८ ॥

अदसो मात् परौ स्वर्घाव् उदूताव् आप्नुतः । अमू ।

एर् ई व्वे ॥ १५९ ॥

अदसो मात् परो व्ये निष्पन्न एकार ईः स्यात्। अमी। अमुन्। अमू। अमून्। टादसश्चास्त्रियां तु ना। अमुना। अमूभ्यान्। अमीभिः। अमुष्मै। अमूभ्यान्। अमीभ्यः। अमुष्मात्। अमूभ्यान्। अमीभ्यः। अमुष्य। अमुयोः। अमीषान्। अमुष्मिन्। अमुयोः। अमीषु।

॥ इति व्हसन्तपुंलिङ्गपादः ॥

नह्नो धङ् भौ ॥ १६० ॥

नह्नो ह्नस्य धङ् स्याद् भौ परे। अडावृ इतौ। उपानत्। उपानद्। उपानह्नौ। उपानह्नः। उपानद्भ्यामित्यादि।

चुडिति कङ्। उञ्छिक्। उञ्छिह्नौ। उञ्छिह्नः। उञ्छिग्भ्यामित्यादि।

दिव औङ् सौ ॥ १६१ ॥

दिव औङ् स्यात् सौ परे। उ इत्। द्यौः। दिवौ। दिवः।

वाम्व् आङ् ॥ १६२ ॥

दिव आङ् स्याद्वा अमि परे। उ इत्। द्याम्। दिवम्। दिवौ। दिवः। दिवा।

उह्नस्य उङ् ॥ १६३ ॥

दिव उङ् स्याद् उवर्णो ह्नसि च परे। उ इत्। द्युभ्याम्।

गीः। गिरौ। गिरः। गीर्भ्याम्। एवं पूः।

स्त्रियां त्रिचतुर इति चतसृ। चतसृभ्यः। चतसृभ्यः। चतसृभिः। चतसृभ्यः २। चतसृणाम्। चतसृषु।

टेरत्र आप्। का। के। काः। इत्यादि सर्वावत्। एवं यद्।

इदमो ऽयमिति। इयम्। इमे। इमाः। इमाम्। इमे। इमाः। अनया। आभ्याम्। आभिः। अस्यै। आभ्याम्। आभ्यः। अस्याः। आभ्याम्। आभ्यः। अस्याः। अनयोः। आसाम्। अस्याम्। अनयोः। आसु।

त्यक्। त्यौ। त्यः। त्याभ्यामित्यादि।

टेर् अत्र आप् । स्या । त्ये । त्याः । इत्यादि सर्वावत् । एवं तद् एतद् ।
वाक् । वाचौ । वाचः । वाचम् । वाचा । वाग्भ्यामित्यादि ।
अप्शब्दो व्यान्तः । नसब्महद्भो ऽधो र्घः । आपः । अपः ।

भ्य् अपो दङ् ॥ १६४ ॥

अपो दङ् स्यात् भि परे । अद्भिः । अद्भ्यः २ । अपाम् । अप्सु ।
दिक् । दिशौ । दिशः । दिग्भ्यामित्यादि । एवं दृक् ।
त्विट् । त्विड् । त्विषौ । त्विषः । त्विषा । त्विड्भ्यामित्यादि ।
सजूः । सजुषौ । सजुषः । सजुषा । सजूर्भ्याम् । सजूष्षु । एवमाशीः ।
अदसः सेरौः । असौ । अमू । अमूः । अमूम् । अमू । अमूः । अमुया । अ-
मूभ्याम् । अमूभिः । अमुष्यै । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमूभ्याम् ।
अमूभ्यः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूष्षु ।

॥ इति हसन्तस्त्रीलिङ्गपादः ॥

स्यमोर्लुगिति । स्रस्ध्वस्वस्विति दङ् । स्वनडुत् । स्वनडुही । अनडु-
च्चतुरो ऽणाणाविति । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । चत्वारि ।
ब्रह्म ।

क्लीबे नो लुब् वा धौ ॥ १६५ ॥

नपुंसके नस्य लुप् स्याद्वा धौ परे । हे ब्रह्म । हे ब्रह्मन् । ब्रह्मणी ।
ब्रह्माणि ।
अहः । अह्नी । अहनी । अहानि । अह्ना । अहोभ्याम् ।
किम् । के । कानि । इदम् । इमे । इमानि ।
असृक् । असृजी । असृञ्जि । असानि । असृजा । अस्ना । असृग्भ्याम् ।
असभ्यामित्यादि ।
ऊर्क् । ऊर्जी । ऊर्जि । ऊर्ञ्जि । सुवल् । सुवल्गी । सुवल्गि । सुव-

न्त्ग । नुणयनेत्यत्र झसन्तरलयोरिति नुणुकारेद् नुर् विन्दुमात्रस्य नाख्या । त्यत् । त्ये । त्यानि । एव यत् तत् एतत् । अनूक्तौ तु एनत् ।

गवाक् । गोची । गवाञ्चि । तिर्यक् । तिरश्ची । तिर्यञ्चि । एवं परे । यकृत् । यकृती । यकृन्ति । यकानि । यकृता । यक्ना । यकृद्भ्याम् । यकभ्यामित्यादि । एवं शकृत् ।

ददत् । ददती ।

द्वेः शतुर् नुण् शौ ॥ १६६ ॥

द्वेः परस्य शतुर् नुण् स्याद्वा शौ परे । ददन्ति । ददति । एवं जक्षत्-जाग्रदादयः । तुदत् ।

आद् ईषोः ॥ १६७ ॥

अवर्णात् परस्य शतुर् नुण् स्याद्वा ईकारे ईषि च परे । तुदन्ती । तुदती । तुदन्ति । भात् । भान्ती । भाती । भान्ति ।

पचत् ।

अप्यनो नित्यम् ॥ १६८ ॥

अपो यनश्च परस्य शतुर् नित्यं नुण् स्याद् ईईषोः परयोः । पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति ।

स्वप् । स्वपी । नसन्महद्भ्यो ऽधो र्घः । स्वाम्पि । स्वपा । भ्यपो दङ् । स्वद्भिः । सपेति रङ् । धनुः । धनुषी । धनूंषि । एवं हविः ।

अदः । अमू । अमूनि ।

॥ इति हसन्तनपुंसकपादः ॥

व्याल् लुक् क्तेः ॥ १६९ ॥

व्यात् परस्याः क्तेर् लुक् स्यात् । स्वः । प्रातः । च । वा । हा । है । उच्चैः । उच्चकैः । धिक् । धकित् । प्र । परा । हरिवत् । कृत्वा ।

उदः सः स्थास्तम्भोः ॥ १७० ॥

उदः परयोरनयोः सस्य लुक् स्यात् । उत्थानम् । उत्तम्भः ।

वातो ऽवाप्योः ॥ १७१ ॥

अवाप्योर् अकारस्य लुक् स्याद्वा । वगाहः । अवगाहः । पिधानम् । अपिधानम् ।

॥ इति व्यपादः ॥

॥ इति हसन्ताध्यायः ॥ ३ ॥

स्त्रियाम् अत आप् ॥ १ ॥

स्त्रीलिङ्गे स्थिताद् अकारान्ताद् आप् स्यात् । मेधा । सर्वा ।

हसाद् वा ॥ २ ॥

स्त्रियां हसन्ताद् आप् स्याद्वा । वाचा वाक् । दिशा दिक् ।

मनो डाप् ॥ ३ ॥

स्त्रियां मनन्ताद्वा डाप् स्यात् । सीमे सीमानौ । पामे पामानौ ।

हे ऽनः ॥ ४ ॥

स्त्रियां स्थिताद् अनन्ताद्वा डाप् स्याद् हे । वङ्यज्वे वङ्यज्वानौ ।

ईप् चाम्वस्यात् ॥ ५ ॥

मस्यवस्यान्यपराद् अनन्ताद् हे स्थितात्स्त्रियाम् ईप् डाप् च स्याद्वा । वङ्राज्ञ्यौ । वङ्राजे । वङ्राजानौ ।

काप्य् अनाशीरके ऽद् इद् अयत्तत्क्षिपादेः ॥ ६ ॥

आशीरर्थाकवर्जे कापि परे ऽकार इकारः स्यात् । न तु यदस्तदः क्षिपादेः । सर्विका । कारिका । आशीरके तु जीवका । यदादेस्तु यका । सका । क्षिपका ध्रुवका चटका ।

द्वैपमूतपुत्रवृन्दारस्वज्ञाजभस्त्राधुत्यक्योर् वा ॥ ७ ॥

द्वादेर् धुत्यवर्जयोः कययोश् च अकार इकारः स्याद्वा कापि । द्विके द्वके । चटकिका चटकका । आर्यिका आर्यका । धुत्ययोस् तु नायिका । क्वत्यिका ।

वाच् चापो ऽनुक्तपुंस्कस्य ॥ ८ ॥

आपः स्थाने जातो ऽकार इद् आच् च स्याद्वा कापि परे । न तूक्तपुंस्कस्य । गङ्गिका गङ्गका गङ्गाका । उक्तपुंस्कस्य तु शुभ्रिका ।

ष्ट्व्रिद्न्र्अन्च्वाह्नदादेर् ईप् ॥ ९ ॥

षकारेतष् टकारेत उकारेत ऋकारेतो नान्ताद् ऋदन्ताद् अन्चो वाह्नो नदादेश्च ईप् स्यात्स्त्रियाम् ।

य्अयोर् लोपो ऽयुक्तौ पौ ॥ १० ॥

इवर्णावर्णयोर् लोपः स्याद् अयाव् अक्तौ पौ परे । ष । वैष्णवी । वराकी ।

क्यङ्यच्वौ चानात्य् अपत्यल्यस्य ॥ ११ ॥

अपत्यार्थल्यस्य लोपः स्याद् अयाव् अक्तौ पौ परे क्ये ङ्ये च्वौ च । न त्व् आकारे । गार्गी ।

सूर्यागस्त्यस्य तिष्यपुष्यस्य ल्यमत्स्यस्येयेषोर् भल ईपि यः ॥ १२ ॥

एषां यस्य लोपः स्याद् ईयेषोः परयोर्नक्षत्रल्ये ईपि च । सौरी । आगस्ती । चातुरी ।

ट । त्रयी । भूषणी ।

उ । विदुषी । श्रीमती । भवती ।

ऋ । अप्यनो नित्यम् । पचन्ती । दीव्यन्ती । आदीषोः । तुदन्ती तुदती । भान्ती भाती ।

न । दण्डिनी । अर्वती । राज्ञी । शुनी । मघवती मघोनी ।

ऋ । कर्त्री । क्रोष्ट्री ।

अन्च्। प्रतीची प्रत्यञ्ची। तिरश्ची तिर्यञ्ची। अमुमुईची। अदमुईची। उदीची। वाह्। भारौही। श्वेतौही श्वेतवाही। शाल्यूही।

नदी। मत्सी। गौरी।

णअचश्वसाद् वनो रङ् ईत्र् वा तु व्हे॥ १३॥

णाद् अचः श्वसाच् च विहिताद् वन ईप् स्यात्। वनो रङ् च स्त्रियाम्। व्हे तु वा। अवावरी। धीवरी। हरिदश्वरी। बहुधीवरी बहुधीवा।

सू नम् चोधःसंख्यादिदामवयोऽर्थहायनाद् व्हे॥ १४॥

ऊधसः संख्यापूर्वदाम्नो वयोऽर्थहायनाच्च ईप् स्याद् व्हे। सस्य च नः स्यात्। पीनोध्नी। द्विदाम्नी। द्विहायनी।

जातेर् अतो ऽस्त्रीपुङ्सत्काण्डप्राक्प्रान्तशतैकादिपुष्पसंभस्त्राजिनैकशणापिण्डादिफलनादिमूलात्॥ १५॥

जातिवाचिनो ऽकारान्तात्स्त्रियाम् ईप् स्यात्। न तु स्त्रीपुङ्आदेः। मृगी। हंसी। शीतपाकी। स्त्रीपुङ्आदेस्तु मक्षिका। वैश्या। सत्पुष्पा। संफला। अमूला। जातेः किम्। मन्दा।

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाग्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥

गार्गी। कठी। कौथुमी।

गुणाद् वोतो ऽखरुस्योङः॥ १६॥

गुणवाचकाद् उकारान्तात्स्त्रियाम् ईप् स्याद्वा। न तु खरोः स्योङश्च। मृद्वी मृदुः। खरुस्योङस्तु खरुः। पाण्डुः। गुणात्किम्।

सत्त्वे निविशते ऽपैति पृथग्जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सो ऽसत्त्वप्रकृतिर्गुणः॥

धेनुः।

पाणृशोणादिन्याङ्गो ऽन्तेर् वा॥ १७॥

पादः शोणादेः स्वाङ्गाद् इकारान्ताच्च स्त्रियाम् ईप् स्याद्वा । न तु क्रोः ।
त्रिपदी त्रिपाद् । शोणी शोणा । चण्डी चण्डा । बिम्बोष्ठी बिम्बोष्ठा ।
स्वाङ्गात्किम् ।

स्वाङ्गं स्याद्द्रवं मूर्तं प्राणिस्थमविकारजम् ।
दृष्टं तत्रातत्स्थमपि तद्वत्तादृशि च स्थितम् ॥

वऊस्वेदा द्रवत्वात् । सुज्ञाना अमूर्तत्वात् । सुनुखा शाला अप्राणिस्थत्वात् ।
सुशोभा विकारजत्वात् । सुकेशी सुकेशा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् । सुस्तनी सुस्तना प्रतिमा प्राणिस्थवत्प्राणिसदृशे स्थितत्वात् ।

राज्ञी राज्ञिः । क्रोस्तु बुद्धिः । मतिः ।

धात् क्रीतात् ॥ १८ ॥

धनक्रीती धनेन क्रीयते स्म ।

क्तात् अल्पे ॥ १९ ॥

धादित्येव । अक्षलिप्ती अक्षेण लिप्यते स्म ।

स्वाङ्गाद् क्रे ॥ २० ॥

स्वाङ्गात्परो क्रे स्थितो यः क्तः । तस्माद् ईप् स्यात् । शङ्खभिन्नी ।

वाच्छन्नाज्ञातेः ॥ २१ ॥

आच्छादनजातिवर्जाज्जातिवाचिनः पराद् क्रे स्थितात् क्तात् ईप् स्याद्वा ।
इक्षुभक्षितौ इक्षुभक्षिता । छन्नात्तु वस्त्रच्छन्ना ।

पल्यामपालकात्तात् ॥ २२ ॥

पुंवाचकात्पालकात्ताद् ईप् स्याद्भार्यायाम् । गोपी । पालकात्तात्तु गोपालिका ।

ब्रह्मरुद्रभवशर्वमृडेन्द्रवरुणाद् आनङ् च ॥ २३ ॥

एभ्यः पल्यान् ईप् स्यात् । तेभ्यान् आनङ् च । ब्रह्माणी । रुद्राणी ।

मातुलोपाध्यायक्षत्रियाचार्यसूर्यार्याद्वा ॥ २४ ॥

मातुली मातुलानी । अन्ये त्वीपमपि विकल्पयन्ति । तदा मातुलेत्यादि । तद्वाशब्दस्य व्यवस्थाप्यम् । आचार्यानी अत्र न णत्वम् ।

वृषाकप्यग्निमनुपूतक्रतुकुसितकुसीदाद् ऐङ् च ॥ २५ ॥

एभ्यः पत्न्याम् ईप् स्यात् । तेषाम् ऐङ् च । वृषाकपायी । अग्नायी । मनायी ।

नारीसखीयवानीयवनानीहिमान्यरण्यानीमनावीपतिवत्न्यन्तर्वत्नीपत्नीभाजी-गोणीनागीस्थलीकुण्डीकालीकुशीकामुकीघटीकवरीनील्यशिश्व्यः ॥ २६ ॥

एत ईवन्ता निपात्यन्ते ।

पद्धतीशक्तीयुवत्यनड्वाहीश्वेन्येनीहरिणीभरिणीरोहिणीलोहिन्यसिक्नीप-लिक्न्यो वा ॥ २७ ॥

पक्षे पद्धतिः । शक्तिः । यूनी । अनडुही । श्वेता । एता । हरिता । भरिता । रोहिता । लोहिता । असिता । पलिता । असिक्नी अवृद्धा । पलिक्नी वृद्धा ।

न मन्संख्यास्वस्रजादेः ॥ २८ ॥

एभ्य ईव् न स्यात् । सीमा । पञ्च । स्वसा । अजा । बाला । नेपीत्युक्तेः । यावती । बह्वी ।

उतो ऽयुङ्रज्ज्वादेर् वप्राणिजातेर् ऊप् ॥ २९ ॥

स्त्रियामुकारान्ताद् नृजातेरप्राणिजातेश्च ऊप् स्यात् । न तु युङो रज्ज्वा-देश्च । कुरूः । कर्कन्धूः । प्राणिजातेस्तु धेनुः । युङ्रज्ज्वादेस्तु अध्वर्युः । रज्जुः । हनुः ।

वामलक्ष्मणशफसहसहितसंहितोपमानादूरोः ॥ ३० ॥

वामोरूः । रम्भोरूः ।

तन्वादेर्वा ॥ ३१ ॥

तनूः । तनुः । चञ्चूः । चञ्चुः ।

॥ इति स्त्रीत्यपादः ॥ ४ ॥

त्यर्थसंबुद्ध्युक्तार्थे प्री ॥ १ ॥

लेर् अर्थे संबोधने त्यैर् उक्तार्थे के सति च प्री स्यात् । कृष्णः । श्रीः । ज्ञानम् । हे विष्णो ।

शर्वो ऽर्च्यो जीवनः पाता दानीयः प्रभवो लयः ।

कर्मक्रियाविशेषणाभिनिविशाधिशीङ्स्थासन्वध्युपावसडं ढं द्वी ॥ २ ॥

कार्यं क्रियाविशेषणमभिनिविशादेर् डं च ढसंज्ञं स्यात् । तत्र च द्वी ।

रामं नमति सानन्दं धर्मानभिनिविश्य सन् ॥

श्रीशो ऽधिशेते ऽहिमधिष्ठितो ऽब्धि-

मध्यास्य घोषं मथुरामनूष्य ।

यो द्वारकामध्युषितो विकुण्ठ-

मुपावसच्चावसतात्स हृद्नः ॥

देशाध्वकालभावं वाढैः ॥ ३ ॥

अढैर् धुभिर् योग एते ढसंज्ञा वा स्युः ।

नदीर्वनेषु चोषित्वा क्रोशान्नलेष्वहर्निशि ।

चङ्क्रमित्वा प्रियानीतिं रक्षोवधे स्थितः ॥

सदाध्वादि व्याप्तौ सर्वैः सिद्धे तु धम् ॥ ४ ॥

सर्वैर् धुभिर् योगे ऽत्यन्तसंयोगे ऽध्वादयो नित्यं ढसंज्ञाः स्युः । अर्थसिद्धौ तु धसंज्ञाः ।

भृत्यैः कृष्णो ऽन्वितः क्रोशं मासौ गुरुगृहे स्थितः ।

गुरूपदेशं निभृतो माभ्यामध्यैष्ट वाङ्मयम् ॥

घो ऽशौ जेः शब्दाशनगतिज्ञार्थाऽयज्यन्तदृशश्रोर् आखादनीक्रन्दायशब्दायल्ला-
दासूतयवल्हाहिंसाभक्षो ह्वकृञाभिवादिदृशस्तु वा ॥ ५ ॥

अज्यन्तानां शब्दार्थादीनां यो घः । स ज्यन्तानां ठं स्यात् । न तु खा-
दादेः । ह्वादेस्तु वा ।

गेयमध्यापयद्गोपान्याज्ञिकान्नमभोजयत् ।
स्वधामागमयच्चान्तॄन्भक्तांस्तत्त्वमबोधयत् ॥
धर्मान्स्थापयद्विप्रुर्वेदानग्राहयद्विधिन् ।
दैत्यानदर्शयच्छान्तिं वेणुनाश्रावयच्च गाः ॥

खादादेस्तु ।

रक्षांस्यखादयदनाययदूर्ध्वलोक-
माक्रन्दयत्कपिभिराययदाशु रामः ।
शब्दाययत्त्रिपुमनूल्लवदादयच्च
शैलानवाह्यदभक्षयदिष्टभक्ष्यम् ॥

सारविवहिंसार्थयोस्तु ।

वाहानवाहयत्पार्थमरीश्चाभक्षयद्धरिः ।
शैलानहारयत्कीशान्नृत्तैर्वृत्तानतीहरत् ॥
कपीनकारयत्सेतुं वानरैरपि राघवः ।
स्माभिवादयते वृद्धाञ्जानकीं लक्ष्मणेन च ॥
सीतां रामेण चात्मानमदर्शयत लक्ष्मणः ।

याञ्चार्थदुहचिप्रच्छरुधब्रूशासजिनीवहकृष्दण्डयम्भकृपमन्थमुषपचाद्या धत्रो
द्विकाः ॥ ६ ॥

तमर्थये ऽहं मोक्षं यो गोपैर्दुग्धमदुग्ध गाः ॥
फलान्यवाचिनोद्वृक्षान्वार्त्ताः पप्रच्छ वल्लवान् ।
रुरोध गोकुलं गोपीरब्रवीच्च मनोहरम् ॥

गोपालानन्वशात्केलींस्तत्राजय्यं जिगाय तान् ।
वृन्दावनमनैषीद्गास्तच्छिशूनवहद्व्रजम् ॥
जहारारण्यमाभीरीर्दैत्यान्प्राणानदण्डयत् ।
जग्राह यज्वनो भोज्यमकर्षत्पूतनां बलम् ॥
ममन्थामृतमम्भोधिं मुमोष दितिजांश्च तद् ।
यो ऽसौ पचति लोकानां पुण्यपापं सुखासुखम् ॥

धिक्समयानिकषाहान्तरान्तरेणैनातियेनतेनाभ्युभयपरिसर्वतोविनर्ते ऽभिपरिप्रत्यनूपद्युपर्यधो ऽधिभिः ॥ ७ ॥

एभिर्योगे द्वी स्यात् ।

वीप्सेत्थंभावचिह्ने ऽभिस्तेषु भागे परिप्रती ।
अनुस्तेषु सहार्थे च हीने ऽनूपौ मताविह ॥
धिग्लोकमीश्वराभक्तं समया माधवं रमा ।
निकषा गिरिशं गौरी हा लोकं केशवद्विषम् ॥
कृष्णो ऽन्तरा ब्रह्मशंभू नान्तरेणाच्युतं सुखम् ।
दक्षिणेन हरिं रुद्रो गोविन्दमति नेश्वरः ॥
येनेशं हरिरीशस्तं तेनेशमभितो ऽर्चकाः ।
रामकृष्णावुभयतो गोपेशं परितः परे ॥
प्रमथाः सर्वतः शर्वं शर्म नेशार्चनं विना ।
मुक्तिर्नर्ते ऽच्युतोपास्तिं भूतं भूतमभि प्रभुः ॥
भक्तो विभुमभि प्राज्ञो गोविन्दमभि तिष्ठति ।
हरिं पर्यभवल्लक्ष्मीर्हरं प्रति हलाहलम् ॥
विष्णुमन्वर्च्यते भर्गः शक्रादय उपाच्युतम् ।
लोकानुपर्युपर्यास्ते ऽधो ऽधो ऽध्यधि च माधवः ॥

दिवो धं वा ॥ ८ ॥

दिवो धं ढं स्याद्वा । अक्षैरक्षान्दीव्यतीशः ।

साधनहेतुविशेषणभेदकं धं कर्ता घस् त्री ॥ ९ ॥

नेत्रैः पुण्येन भूषाभिर्नाम्ना दृष्टः शिवो जनैः ।

सहवारणसमोनार्थार्थविनापृथग्नानाद्यैः ॥ १० ॥

एभिर्योगे त्री स्यात् ।

सहेशार्च्यो ऽच्युतो भेदेनालं तेन समो ऽस्ति कः ।

विकारै रहितः शंभुः सतामर्थः शिवार्चया ॥

श्रीर्नेशेन विना शंभुः पृथग्विश्वेन तत्पुनः ।

न नाना शंभुना रामाद्वर्षेणाधोक्षजो ऽवरः ॥

काले भाड् डे वा ॥ ११ ॥

कालवाचिनो नक्षत्रात् त्री वा स्याड् डे ।

रोहिण्यामभवत्कृष्णो रोहिण्यासीच्च चण्डिका ।

मानाद्वीप्सायां ढे ॥ १२ ॥

शतं शतं पयो ऽपीप्यद्वत्सान्विष्णुः शतेन गाः ।

द्विद्रोणेन क्रीणाति । पञ्चकेन क्रीणाति । द्विद्रोणम् । पञ्चकम् ।

संज्ञो ऽस्मृतौ ॥ १३ ॥

स्मरणादन्यस्मिन्नर्थे वर्तमानस्य संपूर्वस्य जानातेर् ढे त्री वा स्यात् ।

संजानीष्व स्वमीशा च संजानीहि ततः शिवम् ।

संदानो भे ऽधर्मे नित्यम् ॥ १४ ॥

संपूर्वदानसंबन्धिन्यधर्मे भे त्री स्याद्नित्यम् ।

संयच्छते स्म गोप्येष्टं श्रीशः संयच्छति श्रियै ।

यस्मै दित्सासूयाक्रोधेर्षारुचिद्रोहस्थाङ्गुश्लाघस्पृहिशप्राध्ईक्षाप्रतिश्रुप्रत्यनुगृधार्यर्था भं ची तादर्थ्ये च ॥ १५ ॥

यस्मै दातुमिच्छा । असूयादयः स्थादेरर्थश्च यस्मै । तद् भसंज्ञं स्यात् । तत्र ची । तादर्थ्ये च ।

ददातु सद्भ्यः स सुखं हरिः स्मरा-
द्गोपीगणो ऽसूयति कुप्यतीर्षति ।
स्म रोचते द्रुह्यति तिष्ठते ह्नुते
ऽश्लाघिष्ट यस्मै स्पृहयत्यशप्त च ॥
गर्गो राध्यति रामाय कृष्णाय स्मेक्षते व्रजे ।

शुभाशुभं पर्यालोचयतीत्यर्थः ।

विभीषणायाशुश्राव राज्यं प्रत्यशृणोद्यशः ॥

प्रतिज्ञातवानित्यर्थः ।

रामः प्रत्यगृणात्तस्मै लक्ष्मणो ऽन्वगृणात्कपिः ।

रामं वदन्तं प्रोत्साहयामासेत्यर्थः ।

शर्वो धारयते सर्वं सद्भ्यस्तं भज मुक्तये ॥

शक्तार्थवषड्हितसुखस्वाहास्वधास्वस्तिनमोभिः ॥ १६ ॥

एभिर्योगे ची स्यात् ।

दैत्येभ्यो ऽलं हरिः पूष्णे वषट्सद्भ्यो हितं सुखम् ।
स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते ॥

ढेनाशिषि वा ॥ १७ ॥

सद्भ्यः सतां वा शं भूयात् ।

परिक्रियो धे वा ॥ १८ ॥

भक्त्यै मुक्तिः परिक्रीता सद्भिर्विष्णो रुषारिभिः ।

गत्यर्थमन्यढे चेष्टावज्ञे ऽनध्वाकाकशूकशृगालनावन्ने वा ॥ १९ ॥

गत्यर्थमन्यत्योर् ढे क्रमाद् मार्गकाकादिवर्जे चेष्टावज्ञयोश् ची स्याद्वा ।

व्रजाय व्रजति श्रीशो व्रजं व्रजति केशवः ।
न त्वा तृणाय मन्ये ऽहं न त्वा मन्ये तृणं खल ॥

चेष्टावज्ञे किम् ।

मनसा द्वारकामेति त्वां मन्ये ऽहं जनार्दनम् ।

अध्वादौ तु ।

गच्छत्यनन्तः पन्थानं न त्वा काकं स मन्यते ॥

यतो ऽपायभीजुगुप्सापराजयप्रमादादानभूत्राणविरामान्तर्धिवारणं जं पी ॥२०॥

यत एते । तज् जसंज्ञं स्यात् । तत्र पी ।

विभीषणः पदाद्भ्रष्टो भ्रातुर्भीतो जुगुप्सितः ।

पापात्पराजितो दुष्ट्वादप्रमत्तो विधेः सतः ॥

आत्तविद्यो मुनेर्जातो भ्रातुस्त्रातो निजैर्भवात् ।

विरतो ऽन्तर्हितो दुष्टाच्चोकाद्रामेण वारितः ॥

अन्यारभ्यार्थाराद्बहिर्विनर्तेप्रतिपर्यपाङ्दिक्शब्दैर्हेतुयवर्थे च ॥ २१ ॥

एभिर्योगे हेतौ यवन्तस्यार्थे च पी स्यात् ।

आङ् व्याप्तिसीम्नोस्त्यागे ऽन्यौ प्रतिदाननिधौ प्रति ।

नेतरो विष्णुरीशानाद्भवात्प्रभृति सो ऽर्च्यते ।

सो ऽस्मदाराद्बहिस्त्वच्यं विना नार्थो वृषादृते ॥

भक्तेः प्रत्यमृतं शंभोः प्रद्युम्नः केशवात्प्रति ।

पर्यनन्तात्त्रयस्तापा आ मृत्योः सेव्यतां हरिः ॥

ब्रह्मास्त्या सकलात्पूर्वः कृष्णाद्रामो ऽवरो गदः ।

आनन्दादीश्वरः शैलादासनादीक्षते ऽलकाम् ॥

शैलमारुह्य आसने चोपविश्येत्यर्थः ।

वारादर्थैः ॥ २२ ॥

दूरान्तिकार्थैर्योगे पी स्याद्वा ।

रामाद्रुद्रस्य यो दूरं पापाद्दुष्ट्वस्य सो ऽन्तिकम् ।

समार्थैर्नार्यस्तस्ताद्धितसुखैर्निर्धारे संबन्धे ढे च पी ॥ २३ ॥

एभिर्योग एषु च पी स्यात् ।

यः सर्वस्य समो यश्च दक्षिणेनोत्तरा स्थितः ॥
उपर्यधः पूर्वतश्च पश्चाद्यस्याखिलं हितम् ।
सुखं च तस्य देवानां वर्यस्य पदयोर्भजे ॥

ज्ञो ऽज्ञाने धे ॥ २४ ॥

शंभोर्मुकुन्दे जानीते भक्त्या जानाति शंकरम् ।

शंभुना साधनेन मुकुन्दे प्रवर्तत इति प्रवृत्त्यर्थश्च जानाति ।

तृप्त्यर्थानां वा ॥ २५ ॥

तृप्त्यर्थधातोः प्रयोगे धे षी स्याद्वा ।

शृङ्गारस्य हरिस्तृप्तः पूर्णः शान्तेन शंकरः ।

ढधे कृत्य् अव्यक्तुकक्तवतुखलार्थक्तोच्यत्रानवसुशीलार्थतृन्भव्यर्णार्थणिनि ॥ २६ ॥

व्यादिवर्जे कृति प्रयुज्यमाने ढे धे च षी स्यात् ।

जगतां कारकः कृष्णः कृतिर्मुररिपोरियम् ।

व्यादौ तु ।

सृष्ट्वा दधिं शारुकमेतदर्चकानुद्गीतवन्तं यतिभिः सुदर्शनम् ।
ज्ञातं हरिं जिष्णुरघानि संस्तुवन्मुदं दधानो ऽर्थितमीयिवान्न कः ॥
शं दाता हृत्कदागामी दायी मोक्षमृणं शिवः ।

कामुकसड्डार्थक्तेन ॥ २७ ॥

कामुकशब्देन वर्तमानडयोर्विहितेन क्तेन च योगे ढे धे च षी स्यात् ।

यो लक्ष्म्याः कामुको ज्ञातः सतां तस्येदमासितम् ॥

ल्यभावक्तास्त्र्यणकसढे धे वा ॥ २८ ॥

ल्ये भावार्थक्ते स्त्रीविहितम् अं णकं च हित्वा अन्यत्र सढे धे च षी स्याद्वा ।

त्वया मम च कृष्णो ऽर्च्यः स्नातं ह्यत्र स यस्य तु ।
सृष्टेः कृतिर्हृतिर्येन चिकीर्षा यस्य भेदिका ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतकुशलायुक्तनिपुणसाधुसुजर्थेनादरे ष्ठी च ॥ २९ ॥

स्वामी मुकुन्दः सर्वेषां साक्षी सर्वेष्वयोक्षजः ।
निश्यर्क्वाप्सरगुर्योर्यो ऽपत्ये मातुः हृत्त्यजम् ॥

कालभावाधारे ङं ष्ठी ॥ ३० ॥

एते ङसंज्ञाः स्युः । तत्र ष्ठी ।

सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्विधः ।
रेमे शरदि गोविन्दो गोपीभिर्हृदिते किलौ ।
कालिन्द्यां कानने केलौ कुशलः सकले स्थितः ॥

अधिकेशार्थोपाधिभ्याम् ॥ ३१ ॥

अधिकार्थेनोपेन स्वाम्यर्थेनाधिना च योगे ष्ठी स्यात् ।

गुणा उप परार्धे स्युर्विष्णोरधि व्हरौ सुराः ।

ठेनार्थात् ॥ ३२ ॥

ठेन योगे निमित्तात् ष्ठी स्यात् । वस्त्रेषु रजकमवधीत्कृष्णः ।

क्तेना ठे ॥ ३३ ॥

क्ताद् विहितेनेना योगे ठे ष्ठी स्यात् । वेदे ऽधीती ।

निर्धारे ऽधिकेन क्रियान्तः कालाध्वनोश्च षी च ॥ ३४ ॥

श्रेष्ठं कृपालुवर्कादे रुद्रैकादशके ऽधिकम् ।
मूर्त्यष्टकाच्छिवं ध्यायन्भुञ्जीया द्व्यह्नि वा त्र्यहात् ॥
भूयो योजनलक्षे ऽर्कं पश्येल्लक्षद्वयाद्विधुम् ।

सीमान्तर्मार्गात् ष्ठी चान्ते ॥ ३५ ॥

सोमनाथाच्छतं क्रोशाः कृष्णः क्रोशेषु चायुते ।

अन्ते किम् ।

गङ्गायमुनयोर्मध्ये कति क्रोशाश्च जाह्नवी ॥

त्र्यादयो ऽर्थार्थैकतोः श्रेस् तु सर्वाः ॥ ३६ ॥

अर्थार्थेनैकतोस् लेस् त्र्यादयः स्युः । श्रेस् तु सर्वाः ।

भुक्त्यर्थेनार्थस्य मुक्तेः किं कार्यं नार्च्यते ऽच्युतः ।

संज्ञा कस् ॥ ३७ ॥

ऽधवभन्नडाः कसंज्ञाः स्युः ।

॥ इति कपादः ॥ ५ ॥

दैक्यं सो ऽन्वये ॥ १ ॥

द्वयोर्बहूनां वा दानाम् ऐक्यं ससंज्ञं स्यात् । तच्चान्वये सति कार्यम् । यथा । वन्द्यौ चरणौ कृष्णस्येत्यर्थे कृष्णचरणौ वन्द्याविति स्यात् । न तु कृष्णवन्द्यौ चरणाविति ।

भिन्नान्यैकार्थद्व्यादिसंख्याव्यादीनां चकृषगवाः ॥ २ ॥

भिन्नार्थानां दानां सप्रू चसंज्ञः । अन्यार्थानां दानां कसंज्ञः । एकार्थानां दानां यसंज्ञः । द्व्यादित्रयन्तपूर्वदानां षसंज्ञः । संख्यापूर्वदानां गसंज्ञः । व्यपूर्वदानां वसंज्ञः स्यात् ।

तोस् लुक् त्ये च ॥ ३ ॥

से स्थितायाः तोस् लुक् स्यात् त्ये च परे ।

इतरेतरयोगे च समाहारे च चो द्विधा ।

हरिश्च हरश्च हरिहरौ । ब्रह्मा च अच्युतश्च ईशश्च ब्रह्माच्युतेशाः ।

पुंवद् ध्रेः ॥ ४ ॥

से स्थितस्य ध्रेः पुंवत्स्यात् त्ये च । पूर्वपश्चिमे ।

क्तो डा तत्पुत्रे सगोत्रविधे चे ॥ ५ ॥

चे स्थितस्य ऋदन्तस्य डा स्याद् ऋदन्ते पुत्रे च परे सगोत्रविद्ये । मातापितरौ । पितापुत्रौ । होतापोतारौ ।

चगैक्यवं क्लीवम् ॥ ६ ॥

चस्यैक्यं गस्यैक्यं वप् च क्लीवं स्यात् ।

चैक्याच् चुदषहो ऽः ॥ ७ ॥

चवर्गान्ताद् दषहान्ताच् चैक्याद् अः स्यात् । वाक् त्वक् । द्वयोः समाहारो वाक्त्वचम् । श्रीस्रजम् । शमीदृशदम् । वाक्त्विषम् । पीठच्छत्रोपानहम् ।

ऊर्वष्ठीवं पदष्ठीवं धेन्वनुडुहौ अहोरात्रः स्त्रीपुंसौ वाग्मनसे अक्षिभ्रुवे दारगवमक्षिभ्रुवादयः साध्याः ॥ ८ ॥

निपातनादिति ।

॥ इति चः ॥

पीतमम्बरं यस्य । असौ पीताम्बरो हरिः । नीलमुज्ज्वलं वपुर्यस्य । असौ नीलोज्ज्वलवपुः कृष्णः । पूर्णो ऽन्त इति । हरिभाविणी । हरिभाविनी । श्रीभावेण । श्रीभावेन । रम्यविणा । श्रीकामेण । रम्यपवेन । रम्ययूना । रम्याङ्गा ।

नञो ऽनौ वाऽहसोः ॥ ९ ॥

नञो ऽचि परे ऽन् हसे च अः स्यात् से वा । नास्त्यन्तो यस्य । असावनन्तः । नान्तः । अच्युतः । नच्युतः ।

महतैकार्थे जातीयवासकरविशिष्टे तु तौ च ॥ १० ॥

महतस् त आ स्यादेकार्थे । जातीयादौ तु तौ च । महावनः ।

पुंवत् स्त्र्य् उक्तपुंस्कः स्त्रियां अमानितावशसत्तरादौ चाङ्ग्ये ॥ ११ ॥

उक्तपुंस्कः स्त्रीलिङ्गः पुंवत्स्यादेकार्थे स्त्रीलिङ्गे ञ्यादौ च । न तु ङ्ग्ये ।

नोप् ताककोङ् पूरण्याख्याप्ङम्रक्तविकारार्थणित् तं ज्ञातिस्वाङ्गेप् त्व् अमानिनि ॥ १२ ॥

ऊवन्तं तस्याकस्य वा केन ककारोङ् पूरणीत्यन्तं संज्ञाभूतम् इम्ङम्रक्तार्थविकारार्थवर्ज्जं णितान्तं च पुंवद्भ स्यात्। ज्ञातिस्वाङ्गे विहितेवन्तं तु मानिनीवर्ज्जं।

पूरणीप्रियामनोज्ञासुभगादुर्भगादान्ताकान्तावामनावामाचपलाबालासमासचिवातनयादुहितृस्वाकल्याणीभक्तौ ॥ १३ ॥

एषु परेषु पुंवद्भ स्यात्।

गवावादेः स्वो ऽन्ते गौण्ये ऽनीयसः ॥ १४ ॥

अन्ते स्थितस्य गोर् आप ईप ऊपश् च स्वः स्यादप्रधानत्वे सति। न त्व् ईयसः। शीतगुः। धस्तनायः। कालतनुः। ईयसस्तु बहुप्रेयसी। ऊत्वादेस्तु वामोरूभार्यः। रसिकाभार्यः। पाचिकाभार्यः। षष्ठीजायः। दत्ताजायः। मैथिलीभार्यः। ब्राह्मणीभार्यः। सुकेशीभार्यः। अमानिनि किम्। ब्राह्मणमानिनी। युनादेस्तु वैयाकरणभार्यः। सौवश्वभार्यः। कापायकन्यः। हैममुद्रिकः। पूरण्यादौ तु।

ह्वे पूरणीप्रमाणीभ्याम् अः ॥ १५ ॥

आभ्याम् अः स्याद् ह्वे। यगोर्लोपो ऽयुक्तौ पौ। कल्याणीपञ्चमा रात्रयः। कल्याणीप्रियः। मुख्यात्र पूरणी। ग्राह्या तेन।

यृतः कः ॥ १६ ॥

दीसंज्ञकाद् ऋदन्ताच्च कः स्याद् ह्वे। कल्याणीपञ्चमीकः पक्षः। रात्रिः पूरणी वाच्या चेति पूर्वत्र मुख्यत्वम्। स्त्रीप्रमाणः।

सह्वः सो वा ॥ १७ ॥

सह्वस्य ह्वे सः स्याद्वा। सह मात्रा वर्तते यः। असौ समातृकः। सहमातृकः।

सक्थ्यक्ष्णः षः स्वाङ्गे ॥ १८ ॥

आभ्यां हे षः स्यात्स्वाङ्गे । दीर्घसक्थः । पुण्डरीकवदक्षिणी यस्य । असौ पुण्डरीकाक्षः । स्वाङ्गे किम् । दीर्घसक्थि शकटम् ।

दारुण्यङ्गुलेः ॥ १९ ॥

पञ्चाङ्गुलं दारु ।

द्वित्रेर्मूर्ध्नः ॥ २० ॥

न्वोर् लोपौतौ ते ऽच्ये ॥ २१ ॥

नस्य लोपः स्यात् । उवर्णस्य ओत् स्याद् अचि ये च ते । द्विमूर्धः ।

संख्याया डो ऽवहोः ॥ २२ ॥

वहुवर्जायाः संख्याया डः स्याद् हे । पञ्च षट्परिमाणं येषां । ते पञ्चपाः । उपगता दश येषाम् । त उपदशाः । वहोस्तु उपवहवः ।

नाभेर्नाम्नि ॥ २३ ॥

पद्मनाभः ।

लोम्नो ऽन्तर्वहिर्भ्याम् ॥ २४ ॥

अन्तर्लोमः । वहिर्लोमः ।

नञ्दुःसोः सक्थ्नो वा ॥ २५ ॥

असक्थिः । असक्थः ।

अस् प्रजायाः ॥ २६ ॥

अप्रजाः । सुप्रजाः ।

मन्दाल्पाच्च तु मेधायाः ॥ २७ ॥

अमेधाः । सुमेधाः । मन्दमेधाः । अल्पमेधाः ।

धर्माद् अन् ॥ २८ ॥

सुधर्मा ।

नञ्सुत्रिव्युपाच् चतुरो ऽः ॥ २९ ॥

एभ्यश्चतुरो ऽः स्याद् व्हे। अचतुरः। सुचतुरः। त्रिचतुरः। विचतुरः। उपचतुरः।

भाद् नेतुः॥ ३०॥

नक्षत्राद्नेतृशब्दाद् अः स्याद् व्हे। मृगनेत्रा रात्रिः।

संख्यासूपमानात् पात् पादो ऽहस्त्यादेः॥ ३१॥

एभ्यः पादस्य पात् स्याद् व्हे। न तु हस्त्यादेः। द्विपाद्। सुपाद्। व्याघ्रपाद्। हस्त्यादेस्तु हस्तिपादः।

कुम्भादेर् ईपि॥ ३२॥

कुम्भादेः परस्य पादस्य पात् स्याद् व्हे ईपि परे। पात्पद्यौ। कुम्भपदी। शतपदी। ईपि किम्। कुम्भपादः।

व्यतीहारे च्विः पूर्वो घों ऽनच्य् आ वा॥ ३३॥

व्यतीहारे यो व्हः। तस्माच् च्विः स्यात्। पूर्वस्य च घः स्याद् आ वा। न त्व् अचि। केशेषु केशेषु गृहीत्वा यद्युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्य यद्युद्धं प्रवृत्तं दण्डादण्डि। मुष्टामुष्टि। मुष्टीमुष्टि। बाहाबाहवि। बाहूबाहवि। अचि तु अस्यासि।

॥ इति व्हः॥

परमश्चासावात्मा चेति परमात्मा। संश्चासौ चिच्चासावानन्दश्चेति सच्चिदानन्दः।

कोटादिः पुंवद् यत्रातोपदेशाये तवे त्व् अजात्याख्यः॥ ३४॥

कोङ् पूरण्यादिः पुंवत्स्यात्। यादौ तवयोस्तु जातिसंज्ञावर्जम्। पाचकस्त्री। पचनभार्या।

द्वित्र्यष्टाधिका द्वात्रयो ऽष्टास् त्रिदशाद्ये ऽन्यपद्के त्व् अनशीतौ वा॥ ३५॥

एषामेते क्रमात्स्युर्दशादित्रिके। चत्वारिंशदादिपद्के ऽशीतिवर्जे तु वा।

द्व्यधिका दश द्वादश । त्रयोदश । अष्टादश । द्वाचत्वारिंशत् । द्विचत्वारिंशत् । अनशीतौ किम् । द्व्यशीतिः ।

वैकोनस्यैकाद्वैकान्नौ संख्यायाम् ॥ ३६ ॥

एकाद्वविंशतिः । एकान्नविंशतिः । एकोनविंशतिः ।

सख्यहोराज्ञः षः षगे च ॥ ३७ ॥

एभ्यः षः स्याद् ये षे गे च । प्रियसखः । परमाहः । महाराजः ।

सर्वैकदेशसंख्यातसंख्याव्याद् नैकाद् नैक्ये ऽह्नो ऽह्नः ॥ ३८ ॥

एभ्यः परस्य अहन् इत्यस्य स्थाने ऽह्नः स्याद् यादौ । न त्वेकात् । न च ऐक्ये ।

प्राग्वद् नो णो ऽतो ऽह्नस्य ॥ ३९ ॥

सर्वाह्णः । पूर्वाह्णः । एकात्तु एकाहः । अत इति किम् । त्रिभिरहोभिर्जातस्त्र्यह्नः ।

कौटग्रामात् तक्ष्णः ॥ ४० ॥

कौटतक्षः । ग्रामतक्षः ।

जातमहद्वृद्धाद् उक्ष्णः ॥ ४१ ॥

जातोक्षः । महोक्षः । वृद्धोक्षः ।

शुनो ऽत्यप्राण्युपमानात् ॥ ४२ ॥

अतेः प्राणिवर्जादुपमानाच्च शुनः षः स्याद् यादौ । आकर्ष इव श्वा आकर्षश्वः । प्राणिनस्तु । व्याघ्र इव श्वा व्याघ्रश्वा ।

पूर्वोत्तरमृगाच्चानतेः सक्थ्नः ॥ ४३ ॥

एभ्यः पूर्वोक्ताच्चातिवर्जात्सक्थ्नः षः स्याद् यादौ । पूर्वसक्थम् । फलकसक्थम् ।

देशाद्ब्रह्मणः कुमहद्भ्यां तु वा ॥ ४४ ॥

कुत्सितो ब्रह्मा कुब्रह्मः । कुब्रह्मा ।

सरोऽनोऽयोऽश्मनः संज्ञातात्योः ॥ ४५ ॥

महानसम् । उपानसम् । लोहितायसम् । पिण्डाश्मः । अमृताश्मः ।

सर्वैकदेशसंख्यातपुण्यवर्षाद्दीर्घाद् रात्रेः ॥ ४६ ॥

रात्रेरेकैकदेशे वर्तमानः पूर्वादिरेकदेशः । पूर्वरात्रः । अपररात्रः ।

गोरऽतार्थे ॥ ४७ ॥

गोशब्दात् षः स्याद् यादौ । न तु तार्थे । परमगवः ।

नावोऽर्धाद् गे च ॥ ४८ ॥

अर्धात्परादौशब्दात् षः स्याद् अतार्थे गे च । अर्धनावन् ।

द्वार्यो वा ॥ ४९ ॥

अर्धनावम् । अर्धनावी ।

॥ इति यः ॥

कृतमाश्रितः कृताश्रितः ।

व्यं पूर्वम् ॥ ५० ॥

परं व्यं पूर्वं स्यात् से सति । रात्राननतिक्रान्ता अतिरात्री । अतिरात्रौ ।
अत्यङ्गः । अतिस्त्रिः ।

संख्याव्याद् रात्र्यङ्गुलिभ्यान् ग्रः ॥ ५१ ॥

संख्याया व्याच् च पराभ्यां रात्र्यङ्गुलिभ्याम् ग्रः स्याद् यादौ । न तु तार्थे । अतिक्रान्तो रात्रिमतिरात्रः । अत्यङ्गुलः ।
स्त्रिणा त्रातो स्त्रित्रातः । विष्णवे दत्तं विष्णुदत्तम् । अच्युताज्ञातमच्युताज्ञातम् । कृतस्य साखा कृतसाखः । महावासः । ग्रामतक्षः । मृगसक्थम् । नालसरसम् । मण्डूकसरसम् । राजगवः । वर्षारात्रः ।

मुख्यार्धोरसः ॥ ५२ ॥

मुख्यार्थाडुरःशब्दाद् अः स्याद् यादौ । अद्योरसन् । मुख्यो ऽद्य इत्यर्थः ।
पुरुषेपूत्तनः पुरुषोत्तनः । अवत्तिषु वत्ता अवत्तिवत्तः ।

॥ इति पः ॥

तस्यार्थे विषये वाच्ये अपत्यार्थञिकादिकम् ।
प्रोक्षात्रादेः समाहारे गस्त्रिभोत्तरदे परे ॥

पञ्चभिर्गोभिः क्रीतः पञ्चगुः ।

गैक्याद् अतो ऽपात्रादेर् ईप् ॥ ५३ ॥

गैक्याद् अकारात्ताद् ईप् स्यात् । न तु पात्रादेः । त्रयाणां लोकानां
समाहारस्त्रिलोकी । पात्रादेस्तु द्विपात्रम् । त्रिभुवनम् । चतुर्युगम् ।

वान्ग्रापः ॥ ५४ ॥

अत्रत्ताद् ग्रापम् च ईप् स्याद्वा । पञ्चकर्मन् । पञ्चकर्मी । त्रिखट्वम् ।
त्रिखट्वी ।

तार्थे मानात् काण्डात् त् अक्षेत्रे ॥ ५५ ॥

त्र्याढकी । त्रिकाण्डी रज्जुः । क्षेत्रे तु त्रिकाण्डा भूमिः ।

पुरुषाद्वा ॥ ५६ ॥

द्विपुरुषी । द्विपुरुषा ।
त्रिसायम् । त्रिगवम् । त्रिनावम् । त्रिखारम् । त्रिखारि । त्र्यहः ।

द्वित्रेर् वाञ्जलेर् अः ॥ ५७ ॥

द्वित्रिभ्यां परादञ्जलेर् अः स्याद्वा । द्व्यञ्जलम् । द्व्यञ्जलि ।
द्व्यञ्जुलम् । त्रिरात्रम् ।
पञ्च गावो धनं यस्य । असौ पञ्चगवधनः । द्विनावधनः । द्विखारधनः ।
द्व्यञ्जलिप्रियः ।

॥ इति गः ॥

वः कत्तानीप्सासादृश्यत्ताकल्यानुक्रमर्द्धिषु ।
वीप्सापर्यन्तयोग्यत्वपश्चाद्यानतिक्रमे ।
शब्दप्रादुर्भावाभावयौगपद्येष्वनेकधा ॥

ञात् तेरु मो ऽतो ऽप्याः ॥ ५८ ॥

अकारान्ताद् वात् परस्याः तेरु मः स्यात् । न तु प्याः । कृष्णमधिकृत्य प्रवृत्ता कथा अधिकृष्णम् । अप्याः किम् । कृष्णस्य समीपादेत उपकृष्णादेतः ।

ञोत्योरु वा ॥ ५९ ॥

उपकृष्णमुपकृष्णेन कार्यम् । उपकृष्णमुपकृष्णे स्थितः ।

लुक् परात् ॥ ६० ॥

अकारान्तादन्यस्माद् वात् परस्याः तेरु लुक् स्यात् ।

सह्नः सो ऽकाले ॥ ६१ ॥

सहस्य सः स्यात् । न तु काले ।

हरेः सदृशं सहरि । काले तु सहपूर्वाह्णम् । तृणेन सकलमत्ति सतृणम् । ज्येष्ठमनुक्रम्य अनुज्येष्ठम् । मद्राणां समृद्धिः सुमद्रम् । विष्णुं विष्णुं प्रति प्रतिविष्णु । अग्निग्रन्थपर्यन्तमधीते साग्नि । रूपस्य योग्यमनुरूपम् । शिवस्य पश्चादनुशिवम् । शक्तिमनतिक्रम्य यथाशक्ति । हरेः शब्दः प्रादुर्भूत इतिहरि । पापस्याभावो ऽपापम् । चक्रेण युगपद्धेहि सचक्रम् । यावन्तः श्लोकाः । तावन्तो ऽच्युतप्रणामा यावच्छ्लोकम् ।

शरद्विपाडपञ्चेतोमनोदिशुपानाहिमवद्विद्विवृअनडुद्दिवातुर्यन्तदो ऽः ॥ ६२ ॥

एभ्यो ऽः स्याद् वे । उपशरदम् ।

जराया जरस् च ॥ ६३ ॥

उपजरसम् ।

सङ्गसोपश्रुते ॥ ६४ ॥

निपात्ये ।

संपरःप्रत्यनुभ्यो ऽक्षणः ॥ ६५ ॥

समक्षम् ।

अनः ॥ ६६ ॥

अव्यक्तात् अः स्याद् वे । अध्यात्मम् ।

स्त्रीवाद्वा ॥ ६७ ॥

उपचर्मम् । उपचर्म ।

उपनदीपौर्णमास्याग्रहायणीगिरेर्वा ॥ ६८ ॥

उपसनिधम् । उपसनिद् । उपनदम् । उपनदि ।

॥ इति वः ॥

पथ्यप्पुरः से ॥ ६९ ॥

एभ्यो ऽः स्यात् से सति । सखिपथौ । स्थपथो देशः । महापथः । दक्षिणापथः । चतुष्पथम् । उपपथम् । विमलापं सरः । विष्णुपुरम् ।

द्यतर्गोरः य् ओ ऽपो ऽनात् ॥ ७० ॥

एभ्यो ऽनवर्णान्तेभ्यो ऽपो ऽकारः ईः स्यात् । द्वीपम् । अन्तरीपम् । अन्तोपम् । समीपम् । अनात् किम् । प्रापम् ।

समापानूपौ ॥ ७१ ॥ ॥

निपात्यौ । समापो देवयजनम् । अनूपो देशः ।

सं तुन् मनःकामे ऽवश्यं त्ये ऽत्यलोपं संनासौ तु क्तितति पाकपचने वा ॥ ७२ ॥

सं तुन् च मनःकामयोः अवश्यं त्ये ऽत्यलोपं याति । सं क्तितततयोः नासः पाकपचनयोर्वा । समनाः । सकामः । स्तुमनाः । स्तुकामः । अ-

वैणवसेव्यः । सङ्क्षितः । संक्षितः । मांस्पाकः । मांसपाकः । मांस्पचनम् । मांसपचनम् ।

धुरो ऽनडुत्स्याः ॥ ७३ ॥

राजधुरा । अनडुत्स्य तु अनड्वूः ।

ऋचः ॥ ७४ ॥

ऋचो ऽः स्यात् से । अर्धर्चम् ।

नञ्वहेर् माणवकवडणे ॥ ७५ ॥

अनृचो माणवकः । वह्वृचश्चरणः । अन्यत्र अनृक्सामं । वह्वृक्सूक्तम् ।

प्रत्यन्ववात् सामलोम्नः ॥ ७६ ॥

प्रतिसामन् । प्रतिलोमम् ।

अद्दणो ऽचतुषि ॥ ७७ ॥

गवामदीव गवाक्तः । चतुषि तु विप्राक्षि ।

ब्रह्महस्तिराजप्रणयाद् वर्चसः ॥ ७८ ॥

ब्रह्मवर्चसम् ।

समवान्धात् तमसः ॥ ७९ ॥

संतमसम् ।

श्रेयोवसीयसश्रेयसनिःश्रेयसम् ॥ ८० ॥

एते निपात्याः ।

तत्तान्ववाद् रक्षसः ॥ ८१ ॥

तत्तद्रक्षसम् ।

प्रत्युरसानुगवे ॥ ८२ ॥

एते निपात्ये ।

गोर् अघनः ॥ ८३ ॥

प्राग्गो रथः ।

पाण्डूदककृष्णाद् भूमेः ॥ ८४ ॥

पाण्डुभूमो देशः ।

संख्याया नदीगोदावरीभ्यां च ॥ ८५ ॥

पञ्चनदम् । सप्तगोदावरम् । द्विभूमः प्रासादः ।

निसः शतो डः ॥ ८६ ॥

निस्त्रिंशः खड्गः । निश्चत्वारिंशः ।

सूत्सुरभिपूतेर् गन्धाद् इर् वा तूपमानात् ॥ ८७ ॥

सुगन्धिः । पद्मगन्धिः । पद्मगन्धः ।

नार्चायां स्वतेः सख्यादेर् अः ॥ ८८ ॥

स्वतिभ्यां परात्सख्यादेर् ओ न स्यात्पूजायाम् । शोभनो राजा सुराजा ।

अतिशयेन राजा अतिराजा । अर्चायां किम् । गामतिक्रान्तो ऽतिगवः ।

किमः क्षेपे ॥ ८९ ॥

किंराजा ।

नञो ऽह्वे ॥ ९० ॥

नञः परात्सख्यादेर् ओ न स्यात् । न तु ह्वयोः । असखा । ह्वयोस्तु

अनपं सरः । अधुरम् ।

पथो वा ॥ ९१ ॥

अपन्थाः । अपथम् । ह्वयोस्तु अपथो देशः । अपथम् ।

कत् क्व् अच्त्रिरथवदे ॥ ९२ ॥

कोर् अजादौ कत् स्यात् । कदन्नम् । कत्त्रयः । कद्रथः । कद्वदः ।

काक्षे ॥ ९३ ॥

काक्षम् ।

पथिपुरुषे वा ॥ ९४ ॥

कापथः । कुपथः । कापुरुषः । कुपुरुषः ।

कोर् ईषदर्थे ॥ १५ ॥

कोर् ईषदर्थे का स्यात् । ईषज्जलं काजलम् ।

कत्कवौ चाग्न्युष्णे ॥ १६ ॥

कदग्निः । कवाग्निः । काग्निः । कदुष्णम् । कवोष्णम् । कोष्णम् ।

ज्योतिर्जनपदरात्रिनाभिबन्धुगन्धपिण्डलोहितकुक्षिवेणीब्रह्मचारितीर्थपत्नी-पक्षे समानः सः ॥ १७ ॥

समानं ज्योतिर्यस्य । असौ सज्योतिः ।

रूपनामगोत्रस्थानवर्णवयोवचनधर्मजातीयोदर्ये वा ॥ १८ ॥

समानरूपः । सरूपः ।

॥ इति सपादः ॥ ६ ॥

वाह्वाद्य्अतो ऽत्र्य्आवादेर् गर्गादेर् नडादेः पितृष्वस्रादे रेवत्यादेः शेषशि-वादेः ष्णिष्णेयष्ण्यष्णायनणीयष्णिकष्णा अपत्ये ॥ १ ॥

एभ्य एते क्रमात्स्युरपत्ये ।

णित्ते व्रिर् आद्यचः सुभगसुपञ्चालाद्योस् तु द्व्यन्तदानाम् ॥ २ ॥

अचां मध्य आद्यस्याचो व्रिः स्याड् णिति ते परे । सुभगादेस्तु द्वयोर्द्व-योः । सुपञ्चालादेस्त्वन्तस्य दस्य ।

न्वोर्लोपौतौ ते ऽच्ये । वाहोरपत्यं वाहविः । उपविन्दोरपत्यमौपवि-न्दविः । उडुलोम्नो ऽपत्यमौडुलोमिः । अग्निशर्मणो ऽपत्यमाग्निशर्मिः । कृष्णस्यापत्यं कार्ष्णिः ।

य्वोर् य्उम् दान्ते ऽस्वङ्गव्यङ्गव्यडव्यवहारव्यायामस्वागतस्वध्वरणनः ॥ ३ ॥

आद्यचः स्थाने जातयोर् दान्ते स्थितयोर् यवयोः क्रमाद् इमुनौ स्तो णिति ते । न तु स्वङ्गादेः ।

द्वारस्वरस्वःस्वस्तिस्वादुमृदुव्यल्कसश्वःश्वन्स्फ्यकृतस्वरस्वाध्यायस्वग्रामैकन्य-ग्रोधानां श्वापदन्यङ्कोस्तु वा न तु इति श्वादेः ॥ ४ ॥

द्वारादेर् अद्वितीयस्य न्यग्रोधस्य च य्वोर् य्उन् स्यात्। श्वापदन्यङ्को-स्तु वा। न तु श्वादेर् इकारादौ ते।

वैयश्विः। सौवश्विः। स्वङ्गादेस्तु स्वाङ्गिः। व्याङ्गिः। व्याडिः।

व्यासादेर् इकः सौ ॥ ५ ॥

वैयासकिः। सौधातकिः।

आत्रेयः। शौभ्रेयः। गाङ्गेयः। माल्हेयः। पैवतेयः।

ओर् लोपो ऽकद्रुपाण्ड्वोर् एये ॥ ६ ॥

उवर्णस्य एये परे लोपः स्यात्। न तनयोः। कामण्डलेयः। तयोस्तु काद्रवेयः। पाण्डवेयः।

कल्याणीसुभगादुर्भगाबन्धकीरक्तकीवलीवर्दीज्येष्ठाकनिष्ठामध्यमापरस्त्र्यनुसृ-ष्ट्यनुदृष्टिकुलटाभ्य इनेयः ॥ ७ ॥

सौभागिनेयः। पारस्त्रैणेयः।

क्षुद्रागोधाभ्यो वैरारौ ॥ ८ ॥

नाटेरः। नाटारः। नाटेयः। गौधेरः। गौधारः। गौधेयः।

गार्ग्यः। वात्स्यः। जामदग्न्यः। पाराशर्यः।

ओदौतौ ऽञ्वत् तकृद्यञ्यञ्ञाः ॥ ९ ॥

ओदौद्भ्यां परस्तसंज्ञः कृत्संज्ञश्च यः यञो ञ्यञ् च अञ्वत् स्यात्। बाभ्रव्यः। नाडायनः। गार्ग्यायणः। वात्स्यायनः। दाक्षायणी। पैतृष्वस्रीयः। मातृ-ष्वस्रीयः। रैवतिकः। आश्वपालिकः। यादवः। आङ्गिरसः।

मन्वर्ण्णान्वर्म्मोक्षस्येनो ऽनो ऽध्वात्मनो ऽपत्यत्ते ऽविकारजाभावकर्म्मय ईने न नलोपः ॥ १० ॥

मन्वर्णस्यानो वर्म्मणा उक्ष्णः स्यात् पक्षस्येनश्च चापत्यार्थत्ते। अनो वि-

कारार्थवर्जे ष्णे भावकर्मार्थवर्जे ये च । अध्यात्मनोर् ईने नलोपो न स्यात् ।
याज्वनः । भाद्रवर्मणः । औक्ष्णः । चाक्रिणः ।
शैवः । वासिष्ठः ।

संख्यासंभद्राद् मातुर् ङुर् ष्णे ॥ ११ ॥

द्वैमातुरः ।

नन् पुंस्त्रियोः ॥ १२ ॥

अनयोर् नन् स्यात् ष्णे । न इत् । पौंस्नः । स्त्रैणः ।

कुञ्जादेर् णायन्यो ऽस्त्रीव्वे ऽपत्ये ॥ १३ ॥

कुञ्जादेर् अपत्यार्थे णायन्यः स्यात् । न तु स्त्रियां न च व्वे । कौञ्जायन्यः । ब्राध्नायन्यः । स्त्रीव्वे तु कौञ्जायनी । कौञ्जायनाः ।

गर्गयस्कविदादिभृग्वत्रिकुत्साङ्गिरोवसिष्ठगोतमरूढाल् लुग् व्वे ऽस्त्रियाम् ॥ १४ ॥

देशतुल्याख्यः क्षत्रियो रूढः । एभ्यः परेषामुक्तानां व्वे विहितानां त्यानां लुक् स्यात् । न तु स्त्रियाम् । गर्गाः । वत्साः । यस्काः । लज्जाः । विदाः । उर्वाः । भृगवः । अत्रयः । कुत्साः । अङ्गिरसः । वसिष्ठाः । गोतमाः । अङ्गाः । वङ्गाः । कलिङ्गाः । स्त्रियां तु भार्गव्यः ।

ढ्ये कात् ष्णीककण्ईनेयाश्चानितश्च ॥ १५ ॥

कात् परा एते पूर्वे च सेतो ऽन्नितश्च स्युर् ढे ये च वाच्ये । तर्कं वेत्त्यधीते वा तार्किकः । पदकः । क्रमकः । वैयाकरणः । वाचा कृतं वाचिकम् । पाणिनीयम् । शक्त्या युध्यते शाक्तीकः । याष्टीकः । तिष्येण युक्ता रात्रिस्तैषी । पौषी । क्षत्राय साधुः क्षत्रियः । यज्ञियम् । मथुराया आगतो माथुरः । इह भवमैहिकम् । कादाचित्कम् । ग्रामीणः । ग्राम्यः । मूर्धन्यः । नादेयः । शालीयः । नागरः । अग्र्यः ।

व्यटेर् लोपो ऽनाराच्चाद्यतो ऽच्ये ऽयौ ॥ १६ ॥

व्यस्य टेर् लोपः स्यात् ते ऽचि युवर्जे ये च । न त्वाराच्छाश्वतः । पौनःपुनिकः । वाह्यः । वाह्लीकः ।

न दं तसौ त्व् अस्त्यर्थे च ॥ १७ ॥

अयाव् अचि ये च ते पूर्वं दसंज्ञं न स्यात् । तान्तसान्तौ तु अस्त्यर्थे च । आरातीयः । शाश्वतिकः ।

अह्नो ऽह्नो ऽनीने ॥ १८ ॥

आह्निकम् । ईने तु द्व्यहीनः ।

सुपाञ्चालकः । अर्धपाञ्चालकः । दौवारिकः । सौवरम् । सौवम् । सौवस्तिकम् । सौवादुमृदवम् । वैयल्कसम् । शौवम् । शौवनम् । स्फैयकृतम् । सौवम् । सौवाध्यायिकम् । सौवग्रामिकम् । नैयग्रोधम् । एकेति किम् । न्याग्रोधमूलिकम् । शौवापदम् । श्वापदम् । नैयङ्कवम् । न्याङ्कवम् । श्वागणिकम् ।

विकारसंघभावेदंहितस्वार्थादौ ॥ १९ ॥

एष्वर्थेषु च ते त्याः स्युः । हेम्नो विकारो हैमः । आप्यः । आग्नेयः । भिक्षाणां समूहो भैक्षम् । आह्नम् । गाणिक्यम् । राजकम् । गुरोर्भावो गौरवम् । यौवनम् । साम्यम् । वैरूप्यम् । राज्यम् । सौभाग्यम् । सौहार्दम् । विष्णोरिदं वैष्णवम् । तदीयम् । माघवनम् । शौवनम् ।

ऋद् रो ये ॥ २० ॥

पित्र्यम् ।

हन्षण्धृतराज्ञाम् उङ्लोपः ष्णे ॥ २१ ॥

वार्त्रघ्नम् । पौष्णम् । धार्तराज्ञम् । एषां किम् । सामनम् ।

युष्मदस्मत्त्वन्मदां युष्माकास्माकतवकममकाः ष्णणीने ॥ २२ ॥

यौष्माकम् । यौष्माकीणम् । आस्माकम् । आस्माकीनम् । तावकम् । तावकीनम् । मामकम् । मामकीनम् ।

सूर्याय हितं सौरीयम्। आगस्तीयम्। आत्मनीनम्। चोर एव चौरः। त्रैलोक्यम्। रामकः।

के ऽकः स्वो हे तु वा ॥ २३ ॥

कन्यका। सुकन्यकः। सुकन्याकः।

शिवो देवता यस्य। असौ शैवः। शाक्तेयः।

त्वतौ भावे ॥ २४ ॥

साधुत्वम्। जडता। पाचकत्वम्। ब्राह्मणीत्वम्।

लोको ऽर्घात् सः षस् ति ॥ २५ ॥

यजुष्ट्वम्। र्घात् तु गीस्त्वम्।

च्वत् साम्ये ॥ २६ ॥

उपमानार्थे च्वत् स्यात्। कृष्ण इव कृष्णवत्।

मतुर् अस्त्यर्थे ॥ २७ ॥

श्रीरस्ति यस्य। असौ श्रीमान्। विदुष्मान्। दोष्मान्।

म्ओङ्म्अकपाद् वतुः ॥ २८ ॥

मकारोङो ऽवर्णोङो मकारान्ताद् अवर्णान्तान् कपान्ताच्च वतुः स्यादस्त्यर्थे। लक्ष्मीवान्। यशस्वान्। भास्वान्। किंवान्। ज्ञानवान्। विद्यावान्। विद्युत्वान्।

स्रग्मेधास्मायाद् विन् वा ॥ २९ ॥

स्रग्वी। मेधावी। तेजस्वी। मायावी। पक्षे स्रग्वानित्यादि।

नैकाजाद् इन् वा ॥ ३० ॥

अनेकाचो ऽवर्णान्ताद् इन् वा स्यादस्त्यर्थे। ज्ञानी। शिखी। पक्षे ज्ञानवानित्यादि

शंकम्भ्यां ययुततुतिवभाः ॥ ३१ ॥

शंयः। शंयुः। शन्तः। शन्तुः। शन्तिः। शंवः। शम्भः। एवं कंय इत्यादि।

गोतृणमेधादन्तकाण्डद्युवलवलिपर्वचूडाफेणलोमपामप्रज्ञामधुकेशरजःफलो-
र्णाशृङ्गानिद्रार्शोवातादेर् मिन्सेरोरेरमोलेभतलेलशनणरववलेनव्वारकात्व-
किन् वा ॥ ३२ ॥

एभ्य एते क्रमात्स्युर्वास्त्यर्थे । गोमी ।

नाम्न्यस्त्यर्थे ऽचो र्घः ॥ ३३ ॥

स्वामी ।

तृणसः । मेधिरः । रथिरः । दन्तुरः । काण्डीरः । अण्डीरः । द्युमः ।
द्रुमः । वलूलः । वातूलः । वलिभः । तुन्दिभः । पर्वतः । मरुत्तः । चू-
डालः । मांसलः । फेणिलः । पिच्छिलः । लोमशः । रोमशः । पामनः ।
अङ्गना । प्राज्ञः । श्राद्धः । मधुरः । कुञ्जरः । केशवः । मानवः । रजस्व-
ला । कृषीवलः । फलिनः । वर्हिणः । रथिनः । ऊर्णायुः । अहंयुः ।
शृङ्गारकः । वृन्दारकः । निद्रालुः । दयालुः । अर्शसः । वैजयन्तः । वा-
तकी । अतिसारकी । पक्षे गोमानित्यादि ।

वाग्मिवाचाटवाचालाः ॥ ३४ ॥

वाचो ऽस्त्यर्थ एते निपात्यन्ते ।

जनखलादिगोरथवातात् तेनत्रकट्योलं संघे ॥ ३५ ॥

जनता । वन्धुता । खलिनी । हलिनी । गोत्रा । रथकट्या । वातूलः ।

संख्याया डट् पूरणे ॥ ३६ ॥

एकादशानां पूरण एकादशः ।

नो ऽसंख्यादेर् मट् ॥ ३७ ॥

असंख्यादेर्नान्तसंख्याया मट् स्यात्पूरणे । पञ्चमः ।

तमट् षष्ट्यादेः ॥ ३८ ॥

असंख्यादेः षष्ट्यादेस् तमट् स्यात्पूरणे । षष्टितमः । सप्ततितमः । सं-
ख्यादेस्तु एकषष्टः ।

शतादिमासंसंवत्सरात् ॥ ३९ ॥

एभ्यस् तमट् स्यात्पूरणे । शततमः । एकशततमः । मासतमः । संवत्सरतमः ।

विंशत्यादेर्वा ॥ ४० ॥

विंशतितमः । विंशः । त्रिंशत्तमः । त्रिंशः ।

चतुःषट्कतिकतिपयात् थट् ॥ ४१ ॥

चतुर्थः । षष्ठः । कतिथः । कतिपयथः ।

वडुगणपूगसंघातोस् तिथट् तल्लोपश्च ॥ ४२ ॥

वडुतिथः । यावतिथः ।

द्वितीयतृतीयतूर्यतुरीयाः ॥ ४३ ॥

एते निपात्याः ।

संख्याया धाच् प्रकारे ॥ ४४ ॥

चतुष्प्रकारं चतुर्धा ।

द्वैधं द्वेधा त्रैधं त्रेधा षाष्टिकध्यं वा ॥ ४५ ॥

एते निपात्यन्ते वा प्रकारे । पक्षे द्विधा । त्रिधा । षड्धा । एकधा ।

संख्याया अवयवे तयट् ॥ ४६ ॥

चतुरवयवं चुतष्टयम् ।

द्वित्रेर् वायट् ॥ ४७ ॥

द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ।

तरतमौ द्विबहुनामेकोत्कर्षे ॥ ४८ ॥

द्वयोरेकस्यातिशये तरो बहूनां तमः स्यात् । अयमनयोरतिशयेन विद्वान्विद्वत्तरः । अयमेषामतिशयेन विद्वान्विद्वत्तमः । प्रुश्रतरा । प्रुश्रतमा ।

रूपकल्पे चेवूप् स्वं वा वृत्तिं तु पुंवच्च ॥ ४९ ॥

चकारात् तरतमरूपकल्पेषु ईवन्तम् ऊवन्तं च स्वं वा स्यात्। उदिद् ऋदित् तु पुंवच्च। स्त्रितरा। स्त्रीतरा। वामोरुतरा। वामोरूतरा। विदुषितरा। विदुषीतरा। विद्वत्तरा। सतितरा। सतीतरा। सत्तरा।

त्यादेश् च रूपः ॥ ५० ॥

लेस् त्यादेश् चोत्कर्षे रूपः स्यात्। पटुरूपः। पचतिरूपम्।

किमेव्याच्चाद्रव्ये चतरां चतमाम् ॥ ५१ ॥

किम एदन्ताद् व्यात् त्याद्यन्ताच्च द्विबहूनामेकोत्कर्षे क्रमाच् चतरां चतमां स्तः। न तु द्रव्ये। किंतराम्। प्राह्णेतराम्। उच्चैस्तराम्। पचतितराम्। एवं चतमाम्। द्रव्ये तु उच्चैस्तरस्तरुः।

गुणाद् वेष्ठेयसू ॥ ५२ ॥

गुणवाचिनो द्विबहूनामेकोत्कर्षे क्रमाद् इष्ठेयसू ईयस्विष्ठौ वा स्तः।

ञीमंश्च डिद् नैकाचः ॥ ५३ ॥

ञिर् इमन् इष्ठ ईयसुश् च अनेकाचो लेः परो डित् स्यात्। लघिष्ठः। लघीयान्।

लुग् मद्वद्विनाम् ॥ ५४ ॥

मतिष्ठः। मेधिष्ठः।

तृन् लोप्यः ॥ ५५ ॥

करिष्ठः।

वाढान्तिकस्थूलदूरयुवक्षिप्रक्षुद्रप्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घह्रस्ववृद्धवृन्दारकाः साधनेदस्थवदवयवक्षेपक्षोदप्रस्थस्फवरगरवंहत्रपद्राघह्रसवर्षवृन्दाः ॥ ५६ ॥

एषामेते क्रमात्स्युर् ज्यादिषु। साधिष्ठः। नेदिष्ठः। स्थविष्ठः। दविष्ठः। यविष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। गरिष्ठः। वंहिष्ठः। त्रपिष्ठः। द्राघिष्ठः। ह्रसिष्ठः। वर्षिष्ठः। वृन्दिष्ठः।

प्रशस्यः श्रः ॥ ५७ ॥

श्रेष्ठः ।

ज्यो वृद्धश्चेयस्व्य् आः ॥ ५८ ॥

वृद्धः प्रशस्यश्च ज्यादौ ज्यः स्यात् । तस्माच्चेयसोर् ई आः स्यात् ।

ज्यैष्ठः । ज्यायान् ।

पृथुमृदुकृशभृशदृढपरिवृढस्यर्द् रः ॥ ५९ ॥

एषामृकारस्य ज्यादौ रः स्यात् । प्रथिष्ठः ।

युवाल्पौ कन् वा ॥ ६० ॥

कनिष्ठः । यविष्ठः । अल्पिष्ठः । एवमीयसौ ।

गुणाद् इमन् भावे ॥ ६१ ॥

गुणवाचिन इमन् स्याद्भावे । लघिमा ।

भूयोभूमभूयिष्ठाः ॥ ६२ ॥

बह्वोरीयस्विमन्निष्ठान्तस्य क्रमादेते निपात्यन्ते ।

त्यादेश्चोने कल्पदेश्यदेशीयाः ॥ ६३ ॥

लेस् त्याद्यन्ताच्च ईषदूने ऽर्थ एते स्युः । ईषदूनो विद्वान्विद्वत्कल्पः ।

विद्वद्देश्यः । विद्वद्देशीयः । तार्किकदेशीयः । पचतिकल्पम् ।

लेर् वङः प्राक् ॥ ६४ ॥

ईषदूनः पटुर्वङपटुः ।

पाशः कुत्सायाम् ॥ ६५ ॥

कुत्सितो भिषग्भिषक्पाशः ।

चरट् भूतपूर्वे ॥ ६६ ॥

भूतपूर्व आढ्य आढ्यचरः ।

ष्या रूप्यश् च ॥ ६७ ॥

ष्यन्ताद् रूप्यश् चरट् च स्याद्भूतपूर्वे ऽर्थे । कृष्णस्य भूतपूर्वो गौः कृष्ण-रूप्यः । कृष्णचरः । शुभ्रारूप्यः । शुभ्रचरः ।

बह्वल्पार्थात् काच् चशस् वा ॥ ६८ ॥

बह्वर्थादल्पार्थाच्च कात् परम् चशस् वा स्यात्। बहुशो देहि। भूरिशः। अल्पशः। स्तोकशः।

संख्यैकार्थाद्वीप्सायाम् ॥ ६९ ॥

कति कति कतिशः। गणशः। यावच्छः। तावच्छः। द्विशः। पादशः।

चकृत्वस् वारे ॥ ७० ॥

संख्यायाम् चकृत्वस् स्याद्वारे। कति वारान्भुङ्क्ते कतिकृत्वः। पञ्चकृत्वः। गणकृत्वः।

सुच् चतुर्द्वित्रेः ॥ ७१ ॥

एभ्यः सुच् स्याद्वारे। चतुः। द्विः। त्रिः।

मयट् तद्रूपे ॥ ७२ ॥

तदात्मके ऽर्थे मयट् स्यात्। विल्वात्मकं विल्वमयम्। त्रायमयम्।

प्रकारे ज्ञातीयः ॥ ७३ ॥

तार्किकज्ञातीयः। मल्लज्ञातीयः।

वित्ते चुञ्चुचनौ ॥ ७४ ॥

विद्याचुञ्चुः। विद्याचनः।

निर्वृत्ते भावाद् इमः ॥ ७५ ॥

पाकिमो घटः।

पशुभ्यः स्थानद्विपदे गोष्ठगोयुगपङ्क्तयम् ॥ ७६ ॥

गोगोष्ठम्। गोगोयुगम्। गोपङ्क्तयम्।

प्रगण्डोत्तम्यो ऽपकर्षे रष्टरौ ॥ ७७ ॥

अपकृष्टा प्रगण्डा प्रगण्डारः। शमीरः। कुटीरः। उत्तरो।

पीलुतिलोमाकार्णादेः कुणातैलकटज्ञाकं पाकस्नेहरसेमूले ॥ ७८ ॥

पीलुकुणः। तिलतैलम्। उमाकटः। कार्णाज्ञाकम्।

क्षेत्रे शाकटशाकिनौ ॥ ७९ ॥

इक्षुशाकटम् । इक्षुशाकिनम् ।

इतो ऽस्य जाते ॥ ८० ॥

फलितम् ।

च्विः कृभ्वस्स्व् अभूततद्भावे ऽस्वाव् ईर्वाव् अव्यस्य ॥ ८१ ॥

अभूततद्भावे ऽर्थे कृभ्वस्तिषु परेषु च्विः स्यात् । तस्मिंश्च अवर्णस्वयोर् ईकारर्वौ स्तः । न तु व्यस्य ।

त्यो वमात्रो लोप्यः ॥ ८२ ॥

वकारमात्रस् त्यो लोप्यः स्यात् । अकृष्णं कृष्णं करोति कृष्णीकरोति । कृष्णीभवति । कृष्णीस्यात् ।

यङ्ड्यक्ये चर्द् रीः ॥ ८३ ॥

ऋकारो रीः स्याद् यङि ड्ये क्ये च्वौ च । मात्रीकरोति ।

मनश्चक्षुश्चेतो ऽरूरजोरह्नो ऽन्तलोपश् च्वौ ॥ ८४ ॥

मनीकरोति ।

कार्त्स्न्यायत्त्योः संपद्यक्रादौ चसाद् वा ॥ ८५ ॥

साकल्ये ऽधीनत्वे च संपद्यतिकृभ्वस्तिषु परेषु चसात् स्याद्वा । कृत्स्नं लवणं जलं संपद्यते जलसात्संपद्यते । राजायत्तं संपद्यते राजसात्संपद्यते ।

देये त्राच् च ॥ ८६ ॥

देये ऽर्थे त्राच् चसाच् च स्यात्संपद्यादौ । देवाय देयं करोति देवत्राकरोति । देवसात्करोति ।

नैकाचो ऽव्यक्तानुकरणाड् डाच् वानितौ द्विश्च ॥ ८७ ॥

अनेकाचो ऽव्यक्तानुकरणात्संपद्यादौ डाच् स्याद्वा । न त्वितौ । तस्मिंश्च द्विर्भावः

त लोप्यो ऽतप् टिस् व् इतौ द्वेस् व् अन्तो वा ॥ ८८ ॥

तत्यादन्तस्य त लोप्यो डाचि । इतौ तु टिस् लोप्यः । द्वेस् व् अन्तो लोप्यो वा । पटपटाकरोति । एकाचस्तु सृक्करोति । इतौ तु पटदिति करोति । पटिति । पटत्पटेति । पटत्पटदिति ।

तीयसन्वबीन्नसंख्यादिगुणात् कृजि कृषौ ॥ ८९ ॥

एभ्यः करोतौ डाच् स्यात्कृषौ । द्वितीयकर्षणं करोति द्वितीयाकरोति । सन्वाकरोति । वीन्नेन सह कर्षति वीन्नाकरोति । द्विगुणाकरोति ।

सनयनिष्कुलडुप्लवप्लूलसत्याद् यापननिष्क्रोपप्राप्तिकूल्यपाकाशपत्ये ॥ ९० ॥

एभ्यः क्रमादेतेष्वर्थेषु डाच् स्यात् कृजि । सनयाकरोति । निष्कुलाकरोति । डुप्लवाकरोति । प्लूलाकरोति । सत्याकरोति ।

सपत्ननिष्पत्नात् प्रियसुखाद् भद्रभद्रात् पीडानुकूल्यवपने ॥ ९१ ॥

एभ्यः क्रमादेतेष्वर्थेषु डाच् स्यात् कृजि । सपत्नाकरोति मृगं व्याधः । निष्पत्नाकरोति । प्रियाकरोति । सुखाकरोति । भद्राकरोति । भद्राकरोति ।

दण्डमात्रद्वयसट् माने ॥ ९२ ॥

परिमाणार्थ एते स्युः । दण्डपरिमाणो दण्डदण्डः । दण्डमात्रः । दण्डद्वयसः ।

संख्याशन्शतो डिन् ॥ ९३ ॥

संख्यावाचिनः शन्नन्ताच् शदन्ताच्च डिन् स्याद् माने । दशी । त्रिंशी ।

कतियतितितियावत्तावदेतावत्किंयदियत्तः ॥ ९४ ॥

किंयत्तदां डत्यन्तानां यत्तदेतत्किमिदमां वत्वन्तानेते क्रमाद्विपात्यन्ते माने ।

दशादेर् डो ऽयुते शतादौ ॥ ९५ ॥

एकादशं शतम् । विंशं शतम् ।

किंयत्तदेकान्यात् द्विवहुनामेकनिर्धारणे डतरडतमौ ॥ ९६ ॥

अनयोः कतरो वैतवः । एषां कतमः शैवः ।

तस् त्रेः ॥ ९७ ॥

ङेः स्थाने तस् स्यात्। कृष्णतः। सर्वतः। अमुतः।

देवादेर् द्वीत्योस् त्राच् ॥ ९८ ॥

देवत्रा वन्दे रमे वा।

ग्रिवल्होस् त्रो ऽद्यादेः त्याः ॥ ९९ ॥

ग्रेर् वल्होश् च परस्याः त्यास् त्रः स्यात्। न तु द्वियुष्मदस्मदः। सर्वस्मिन्सर्वत्र। तत्र। बहुत्र।

सर्वैकात् काले दा ॥ १०० ॥

सर्वस्मिन्काले सर्वदा। एकदा।

किमन्यपक्षतो र्हिश् च ॥ १०१ ॥

एभ्यः त्या र्हि दा च स्यात्काले। कस्मिन्काले कर्हि। कदा।

तदो दानीं वा ॥ १०२ ॥

तर्हि। तदा। तदानीम्।

पूर्वान्यान्यतरेतरापराधरोत्तरोभयाद् एषुस् अङ्गि ॥ १०३ ॥

पूर्वस्मिन्नहनि पूर्वेद्युः।

दिक्शब्दाद् दिग्देशकाले स्तात् प्रीपीत्यो ऽचो लुक् ॥ १०४ ॥

पुरस्तात्। प्राक्।

वैनो ऽपी ॥ १०५ ॥

पूर्वेण।

दक्षिणोत्तराद् आहौ ॥ १०६ ॥

दक्षिणा। दक्षिणाहि। उत्तरा। उत्तराहि।

वाधराच् चास्तातः ॥ १०७ ॥

अधरात्। अधरस्मात्। दक्षिणात्। दक्षिणास्तात्।

पूर्वाधरावराः पुराधावाः स्तादसोः ॥ १०८ ॥

पुरस्तात्। पुरः। अधस्तात्। अधः। अवस्तात्। अवः। अत एव अस्।

त्रवत् थाच् प्रकारे ॥ १०९ ॥

येभ्यस् त्र उक्तः । तेभ्यः प्रकारे थाच् स्यात् । स च तद्वत् । सर्वप्रकारं सर्वथा ।

कुतः क्व कुह कुत्रेतो ऽतो ऽत्रेह सदैतर्ह्यधुनेदानीं पश्चादुपर्युपरिष्टात् परेद्यवि सद्यो ऽद्यैषमः परुत् परारीत्थं कथम् ॥ १५० ॥

एते निपात्यन्ते । कस्मात्कुतः । कस्मिन्क्व कुह कुत्र । अस्मादितः । एतस्मादतः । एतस्मिन्नत्र । अस्मिन्निह । सर्वदा सदा । अस्मिन्काल एतर्हि अधुना इदानीम् । पश्चिमं पश्चात् । ऊर्ध्वमुपरि उपरिष्टात् । परस्मिन्नहनि परेद्यवि । समाने ऽह्नि सद्यः । अस्मिन्नहनि अद्य । अस्मिन्वर्ष ऐषमः । पूर्वस्मिन्वर्षे परुत् । पूर्वतरस्मिन्वर्षे परारि । इदंप्रकारमित्थम् । किंप्रकारं कथम् ।

त्यत्राद्यचिरदक्षिणाद्यादेस् त्यष्टनत्नत्यण्मा भवादौ ॥ १५१ ॥

एभ्य एते स्युर्भवाद्यर्थे । त्यत्रत्यः । तत्रत्यः । अद्यतनी । ह्यस्तनी । चिरत्नः । परुत्नः । दाक्षिणात्यः । पाश्चात्यः । आदिमः । मध्यमः ।

किमः क्त्यन्ताच् चिच्चनौ ॥ १५२ ॥

कस्यचित् । कदाचित् । कदाचन ।

आदिस् तः ॥ १५३ ॥

चैक्याच्चुदषहोरित्येतमकारमारभ्य यस् त्य उक्तः । स त्यसंज्ञः स्यात् ।

॥ इति तपादः ॥ ७ ॥

॥ इति स्याद्यन्ताधिकारः समाप्तः ॥

धोस् तिप् तम् अन्ति सिप् थस् थ मिप् वस् मस् । ६ । ते आते अन्ते से आथे ध्वे ए वहे महे । १८ । यात् याताम् युस् यास् यातम् यात याम् याव याम । ६ । ईत ईयाताम् ईरन् ईथाम् ईयाथाम् ईध्वम् ईय ईवहि ईमहि । १८ । तुप् ताम् अन्तु हि तम् त आनिप् आवप् आमप् । ६ । ताम् आताम्

अन्ताम् स्व आथाम् ध्वम् ऐप् आवहैप् आमहैप् । १८ । दिप् ताम् अन् सिप् तम् त अमप् व म । ६ । त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि । १८ । दि ताम् अन् सि तम् त अम् व म । ६ । तम् आताम् अन्त थास् आथाम् ध्वम् इ वहि महि । १८ । णप् अतुस् उस् थप् अथुस् अ णप् व म । ६ । ए आते इरे से आथे ध्वे ए वहे महे । १८ । ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् । ६ । ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे । १८ । यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म । ६ । सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्ताम् सीध्वम् सीय सीवहि सीमहि । १८ । स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस् । ६ । स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे । १८ । स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम । ६ । स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम्-स्ये स्यावहि स्यामहि । १८ । ॥ १ ॥

एतानि साशीतिशतसंख्यकानि धोः पराणि प्रयुज्यन्ते । पणना दिस्योर इकारश् चेतः ।

कीग्लीगीघीटीठीडीढीतीथ्यो ऽष्टादशशः ॥ २ ॥

तान्यष्टादशाष्टादश क्रमादेतत्संज्ञानि स्युः ।

पञ्च रः शिच् च ॥ ३ ॥

ताः पञ्च रसंज्ञाः स्युः शिच् च ।

नवशः पमे जितो ऽन्यङिद्भ्यां घे ॥ ४ ॥

तानि नव नव क्रमात् पमसंज्ञानि स्युः । ते च जितो धोः परे स्तः । तदन्यङिद्भ्यां तु क्रमेण स्तो घे ।

ङिद् अपिद् रः ॥ ५ ॥

अपिद् रो ङित्संज्ञः स्यात् ।

कित् ठीठीपम् ॥ ६ ॥

अपिद् ठी आः पं च कित्संज्ञं स्यात् ।

दाधा दा ॥ ७ ॥

अपिद् दा धा च दासंज्ञः स्यात् ।

यलो ऽचेगु् त्रिः ॥ ८ ॥

अचा युक्तस्य यलस्य स्थान इक् क्रमात् त्रिसंज्ञः स्यात् ।

सकृद् द्विस् तु वा ॥ ९ ॥

त्रिः पुनर्न स्यात् । द्विस् तु वा स्यात् ।

प्राग् अचूकार्याद् अचि द्विः ॥ १० ॥

अचि परे अचूकार्यात्प्रागेव द्विः स्यात् ।

द्वेः पूर्वः खिः ॥ ११ ॥

द्वेर्यः पूर्वो भागः खिसंज्ञः स्यात् ।

स्वर्यो घुट् ॥ १२ ॥

स्वो घुसंज्ञो र्यो हुसंज्ञः स्यात् ।

स्वः स्ये हुः ॥ १३ ॥

स्ये परे स्वो हुसंज्ञः स्यात् ।

॥ इति संज्ञापादः ॥

भू सत्तायाम् । भूतिप् इति स्थिते ।

घे शप् रे ॥ १४ ॥

रे परे धोः शप् स्याद् घे ऽर्थे ।

णुर् घुटम् चाकडिति ॥ १५ ॥

अत्यस्य घुसंज्ञोऽम् च णुः स्यात् । न तु किति डिति । भवात् ।
भवतः ।

लोपो ऽतो ऽद्वेचोः ॥ १६ ॥

अकारस्य लोपः स्याद् अकार एचि च परे । भवन्ति ।

भवसि । भवथः । भवथ । आ ज्ञिभावि । भवामि । भवावः । भवामः ।

भुवः प्रातौ वा मम् ॥ १७ ॥

भवते ।

य् आयातो ऽतः ॥ १८ ॥

अकारात्परयोर् आयातोर् आकार ईः स्यात् । भवेते ।

भवन्ते । भवसे । भवेथे । भवध्वे । भवे । भवावहे । भवामहे ।

ध्या यायुस्यानाम् ईयुसूयन् ॥ १९ ॥

अकारात्परेषां ध्या या युस् याम् एषां स्थाने इ इयुस् इयम् एते क्रमा-
त्स्युः । भवेत् ।

भवेताम् । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ।
भवेत । भवेयाताम् । भवेरन् । भवेथाः । भवेयाथाम् । भवेध्वम् । भवेय ।
भवेवहि । भवेमहि । भवतु । भवताम् । भवन्तु ।

हेर् लोपो ऽस्योपूनोश् च ॥ २० ॥

अकाराद् अस्याभ्याम् उप् नुभ्यां च परस्य हेर् लोपः स्यात् । भव ।
भवतम् । भवत । भवानि ।

व्यस्य ऽनुकारडाच्च्विकणो ऽलंसद्मनो ऽद्रो ऽन्तःपुरो ऽस्तंतिरःकारिकोर्व्या-
देर् धौ सः ॥ २१ ॥

' एषां व्यानां धौ परदे सः स्यात् ।

प्राग्वद् नो णो ऽन्तरड्गर्गेर् नादिहन्मीनाह्निन्व्आनिप्शान्तनशो गदनदप-
तपददानासोहन्वापाद्रासावपवहशमचिदिह्यन्तनेर वा त्व् अनानिंसनिन्द्-
निन्तनयान्तह्नो ऽकाचाग्यपान्तान्तनेः ॥ २२ ॥

नादेर् धोर् हन्तेर् मीनातेर् हिनोतेर् आनिपः शान्तनशो गदादन्त-

नेश् च नस्य अन्तरो दुर्वर्जगेभ्य् च परस्य णविभिन्हौ सति णः स्यात्।
अनादेर् नवात्तन्क्तेः कादिवादिपात्तवर्जधन्तनेश् च वा स्यात्। अन्त-
र्भवाणि। प्रभवाणि। दुरस्तु दुर्भवानि।

भवाव। भवाम। भवताम्। भवेताम्। भवन्ताम्। भवस्व। भवेथाम्।
भवध्वम्। भवै। भवावहै। भवामहै।

घीटीघीव् अन् धोर् अमा ॥ २३ ॥

अमा परासु धोर् अन् स्यात्। न तु मायोगे। अभवत्। अभवताम्।
अभवन्। अभवः। अभवतम्। अभवत। अभवम्। अभवाव। अभवाम।
अभवत। अभवेताम्। अभवन्त। अभवथाः। अभवेथाम्। अभवध्वम्।
अभवे। अभवावहि। अभवामहि।

द्यां सिः ॥ २४ ॥

धोः सिः स्याद् द्याम्।

भूस्थापिबदेनः सेर् लुक् पे ॥ २५ ॥

एभ्यः सेर् लुक् स्यात् पे। अभूत्। अभूताम्।

भुवो वन् टोऽचि ॥ २६ ॥

भुवो वन् स्याद् टोर् अचि परे। अभूवन्।
अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम।

वमो ऽस्येन् अनादितः ॥ २७ ॥

अनादितो धोः परस्य अस्य वमस्य इन् स्यात्। अभविष्ट। अभविषा-
ताम्।

मालो ऽद् अनतः ॥ २८ ॥

नस्यान्त इत्यस्य अत् स्यात्। न तु अकारात्परस्य। अभविषत।
अभविष्ठाः। अभविषाथाम्।

धे सलोपो वा ॥ २९ ॥

टीठीठीयो ठ् इचः सेनस् तु ह्लो वा ॥ ३० ॥

इचः परस्यासां धस्य ठः स्यात् । सेन्ह्लात् परस्य तु वा स्यात् । अ-
भविठ्वम् । अभविध्वम् । रुपतसोरिति सस्य दः । अभविढ्वम् ।
अभविषि । अभविष्वहि । अभविष्महि ।

धुर् ढिष् ठ्यङि ॥ ३१ ॥

ठ्याम् अङि च धुर् ढिः स्यात् ।

कभखघवर्ल्यर्यवृकृॠणां तचचपतस्वच्च्रूआः खेः ॥ ३२ ॥

खेर् कभखघवह्काररवर्णकवर्गऋवर्णानां क्रमात् तचचपतकारस्वचवर्गअका-
राः स्युः ।

भुवो ऽङ् ठ्यां ठणाते तु वा ॥ ३३ ॥

भुवः खेर् अङ् स्याद् ठ्याम् । ठणावयोस्तु वा । बभूव । बभूवतुः । ब-
भूवुः । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम । ब-
भूवे । बभूवाते । बभूविरे । बभूविषे । बभूवाथे । बभूविढ्वे । बभूविध्वे ।
बभूवे । बभूविवहे । बभूविमहे । ठे भावे च बभूवे । बुभूवे । इति प्र-
योगौ ।

भविता । भवितारौ । भवितारः । भवितासि । भवितास्थः । भविता-
स्थ । भवितास्मि । भवितास्वः । भवितास्मः । भविता । भवितारौ ।
भवितारः । भवितासे । भवितासाथे । भविताध्वे । भविताहे । भविता-
स्वहे । भवितास्महे । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूया-
स्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म । भविषीष्ट । भविषीया-
स्ताम् । भविषीरन् । भविषीष्ठाः । भविषीयास्थाम् । भविषीठ्वम् । भवि-
षीध्वम् । भविषीय । भविषीवहि । भविषीमहि । भविष्यति । भवि-
ष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि ।
भविष्यावः । भविष्यामः । भविष्यते । भविष्येते । भविष्यन्ते । भवि-

ष्यसे । भविष्येथे । भविष्यध्वे । भविष्ये । भविष्यावहे । भविष्यामहे । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यन् । अभविष्याव । अभविष्याम । अभविष्यत । अभविष्येताम् । अभविष्यन्त । अभविष्यथाः । अभविष्येथाम् । अभविष्यध्वम् । अभविष्ये । अभविष्यावहि । अभविष्यामहि । त्यादिव्यास-भोसान्तिशिश्रेर्वाक्प्रागित्यादि । भवताकि । भवतकः ।

प्रणिभवति । प्रनिभवति । एवं चेतत्यादयः ।

चिती संज्ञाने ।

हदाद्यन्तिसेर् दिस्योर् ईम् ॥ ३४ ॥

एभ्यो दिस्योर् ईम् स्यात् ।

वस्स्वात् वसोम ईमि सेर् लोपः ॥ ३५ ॥

वसात् स्वाच् च परस्य वसि । इमः परस्य ईमि सेर् लोपः स्यात् । अचेतीत् । अचेतिष्टाम् ।

अन् उस् सिद्धेर् अभुवः ॥ ३६ ॥

सेर् द्वेश् च परस्यान उस् स्यात् । न तु भुवः । अचेतिषुः । अचेतीः ।

खेर् आद्यचो लोप्यो ऽनु शसाखपाद्यन्तान्यस्याद्यन्तौ ॥ ३७ ॥

खेर् आद्यचः परो भागो लोप्यः स्यात् । पश्चाच् शसादिखपान्तो यदि स्यो ऽवशिष्टः । तत्यादिर्लोप्यः । यद्यन्यादृशः । तस्यान्तो लोप्यः । चिचेत । चिचिततुः । चिचितुः ।

च्युतिर् क्षरणे ।

शासिद्युत्पुषादेर् ङप् ङपि तृष्यित्ताभुविपश्चुश्चुश्चुश्रुश्लुश्लुन्चूङ्‌रित-स् तु वा ॥ ३८ ॥

शासोर् लृकारेतो द्युतादेः पुषादेश्च ङः स्याद् टीपे । ञ्चादेस् तु वा ।

अच्युतत् । अच्योतीत् ।

चुच्योत । मन्थ विलोडने ।

स्याद् ढ्यपित् किद् वा ॥ ३९ ॥

हसुङ्नो लोपो ऽणौ ॥ ४० ॥

धोर् हसुङो नस्य लोपः स्याद् अणौ । ममथतुः । ममन्थतुः ।

मथ्यात् ।

कुथि हिंसासंक्लेशयोः ।

नेदित्पूजार्थन्चोः ॥ ४१ ॥

इदितो धोः पूजार्थस्याञ्चतेश्च नलोपो न स्याद् अणौ । अत एवेदितो नुण् । प्रनिकुन्थ्यात् । कादित्वाद् णः ।

षिधु गत्याम् ।

भ्वाद्यादिष्णः स्नो ऽष्ट्यैष्वक्कष्ठिवः ॥ ४२ ॥

भ्वादेरादौ स्थितयोः षणयोः सनौ स्तः । न तु ष्ट्यैष्वक्कष्ठिवाम् ।

सीकसेकसृपसृसृजस्तृस्त्यान्ये दत्त्याजन्तसादयः षोपदेशा धवः स्वक्कस्वित्स्वत्स्वन्जस्वपस्मिङश्च नोपदेशास्त्वनृद्नर्दनाथनाधनन्दनक्कनृनटः ॥ ४३ ॥

सेधति ।

व्याच्छस्य गत्यर्थवदे सः ॥ ४४ ॥

गत्यर्थे वदे च धौ परदे व्यस्याच्छस्य सः स्यात् । अच्छसेधति ।

गीकः स्तुस्तुभसोसुवास्यान्तसुञां स्थासेनिसन्जस्वन्जागतिसेधाप्रतिसदायङ्सिचानङ्स्तन्भान्नव्यवस्वनपरिनिविसेवसुम्अनङ्सिवानोङ्सहां सः षो ऽम्यपि दशस्थादेस्तु द्वेश्च ॥ ४५ ॥

स्त्वादेरस्यान्तसुञः स्थादेरगत्यर्थसेधो ऽप्रतिपूर्वसदो यङ्वर्जसिचो ऽङ्वर्जस्तन्भो ऽन्नार्थव्यवपूर्वस्वनः पर्यादिपूर्वसेवसुम्अङ्वर्जसिवओङ्वर्ज-

सन्धौ च गेर् इकः परः सः षः स्याद् अनान्तरे ऽपि। दशानां स्थादीनां तु द्विरुक्तानां च। निषेधति। न्यषेधत्। गतौ तु गङ्गां व्यसेधत्।

षिधू शास्त्रे माङ्गल्ये च।

वेम् ऊदित्स्वरचायस्फायप्यायसूतिसूयधूञ्स्यादिनिष्कुषो ऽर्वसो हृडसुनोस् त्व् अव्याः ॥ ४६ ॥

एभ्यो वसत्यास्य इम् स्याद्वा। रैत्यादेस्तु ठीवर्जम्। असेधीत्।

व्रजवद्अर्अल्अन्अनिमो ऽजिघ्रिजागुर् त्रिः सौ पे ॥ ४७ ॥

व्रजेर् वदेर् अरन्तस्य अलन्तस्य अनन्तस्य अनिमश्च सौ पे त्रिः स्यात्। न तु जिघ्रिजागृणाम्। असैत्सीत्।

असेधिष्टाम्।

ढभात् तथोर् धो ऽधः ॥ ४८ ॥

ढभात् परयोस्तथयोर् धः स्यात्। न तु धाञः। असैद्धाम्।

खद् स्थैर्ये वधे च।

ह्रसादेः सेमो ऽह्म्येदित्क्षणाश्वसवधो वोङ्अतः सौ पे त्रिः ॥ ४९ ॥

ह्म्यान्ताद् एकारितः क्षणादेश्च अन्यस्य सेमो ह्रसादेर् उङो ऽकारस्य सौ पे त्रिः स्याद्वा। प्रन्यखादीत्। खादित्वाद् न णः। अखदीत्।

ञ्णित्य् अत्येत्उङ्अतोः ॥ ५० ॥

धोर् अत्यस्येव उङो ऽकारस्य च त्रिः स्यात् ञिति णिति च परे। चखाद।

णप्य् अन्ते वा ॥ ५१ ॥

चखाद। चखद।

गद् भाषे। प्रणिगदति।

वद् व्यक्तायां वाचि।

तॄफलभजत्रपश्रन्थग्रन्थदम्भास्वत्तारपन्हसां ध्याः कित्सेन्थप्य् अद् एः गिलोपश्चाशशददवादन्यवादिवर्णानलोपिनां ज्वमथमत्रसफणादिवमार्षराजां तु वा ॥ ५२ ॥

त्रादीनाम् आद्यन्तस्थितास्यन्हसानां च अकारष् ठ्याः किति सेम्थपि च एः स्यात् खिलोपश्च । न तु शशेर् ददेर् वकारादेर् अन्यथाभूतखेर् णुमतो नलोपिनश्च । जृवमभ्रमत्रसफणादीनां हिंसार्थस्य राधेश्च वा स्यात् । वेदतुः । वेदुः । वेदिथ । अन्यथाभूतखेस्तु चखदतुः ।

णद् श्लिष्टोक्तौ । भ्वाद्यादीति णो नः । नदति । प्रणदति । प्रणिनदति ।

अर्द पीडायाम् ।

स्यान्ताद् आद्यृदाद्यश्नोः खेर् आन् ठ्यां वा त्वान्छेः ॥ ५३ ॥

स्यान्तो यो ऽकारादिः । तस्य ऋकारादेर् अश्नोतेश्च खेर् आन् स्याद् ठ्याम् । आञ्छतेस्तु वा । आनर्द ।

इदि परमैश्वर्ये ।

भूयो ऽम् अजादेः ॥ ५४ ॥

अजादेर् अमि कृते पुनर् अम् स्यात् । ऐन्दत् ।

र्व्इजादिदयायासत्यानेकाचो ऽनृछ्ऊर्णोष् ठ्याम् आम् ॥ ५५ ॥

रुसंज्ञेजादेः । दय अय आस । एभ्यस् त्यान्ताद् अनेकाचश्च आम् स्याद् ठ्याम् । न तु ऋछ्ऊर्णोः ।

भ्वस्क्र् अन्व् आमः ॥ ५६ ॥

भू अस कृ एत आमन्तादनुप्रयुज्यन्ते । इन्दांबभूव । इन्दामास । इन्दांचकार ।

नेम् असुम्कृसृवृभृस्तुद्रुश्रुस्रोर् एव ठ्याः ॥ ५७ ॥

एभ्य एव ठ्या इम् न स्यात् । अन्यस्मादनिमो ऽपि स्यात् । इन्दांचकथ ।

णिदि कुत्सायाम् । प्रणिन्दति । प्रनिन्दति ।

उव गतौ ।

खेर् य्वोर् इय्उव् अर्णे ॥ ५८ ॥

ध्वेर् इवर्णोवर्णयोः क्रमाद् इयुवौ स्याताम् अर्णो परे । उवोव । अर्णो किम् । ऊवतुः ।

अन्चु गतिपूजनयोः । नेदित्पूजार्थान्च्वोरिति अञ्च्यात् । गतौ तु अच्यात् ।

म्रुचु इर गत्याम् । शासलिद्युदिति ङो वा । अम्रुचत् । अम्रोचीत् । एवं म्लुचु ग्रुचु ग्लुचु ग्लुन्चु ।

अहि आयामे । आनाञ्ह । आञ्ह ।

वज गतौ । ववजतुः । ववजिथ । वादित्वाद् न एः ।

व्रज गतौ । व्रजयदेति त्रिः । अव्राजीत् ।

अज गतौ क्षेपणे च ।

व्य् अजो ऽरे वा त् अनवल्य् अयजूअलुक्यपि ॥ ५९ ॥

अजतेर् अरे वी स्यात् । अनत्ये वसे च वा स्यात् । न तु घञादौ ।

नेम् एकाजाद् ऋदुदृतो ऽश्विश्रिडीशीयुरुनुस्नुक्षुक्ष्णुवुः ॥ ६० ॥

श्व्यादेरन्येभ्य एकाज्भ्य आदन्तवर्णान्तादृदन्तादृदन्तेभ्य इन् न स्यात् । अवैषीत् । आजीत् ।

विवाय ।

धुधोर् अणवचीयुव् य्वोर् व्यौ त् अस्याद् नैकाचोर् व्योः ॥ ६१ ॥

धोर् धोप् च इवर्णोवर्णयोर् अणाव् अचि इयुवौ स्तः । अनेकाचोस् तु अस्यात् परयोः क्रमाद् उवर्णोवर्णयोर् व्यौ स्तः । विव्यतुः । विव्युः ।

सृजदृशअच्पाठावतो नित्यानिम् तुस् थपो वेम् अनृव्ये ऽदः ॥ ६२ ॥

सृजेर् दृशेर् अजन्ताद् भ्वादिपाठे ऽकारवतो नित्यमिमूर्ज्झितात् स्यात् थप इम् वा स्यात् । न तु ऋ व्येञ् अद एभ्यः । विवयिथ । विवेथ ।

क्षि क्षये ।

धौ ऽत् ण् ऽरे ॥ ६३ ॥

अनन्तस्य घः स्याद् अरे ये परे । क्षीयात् ।

कटे वर्षावरणयोः । एदित्वाद् न त्रिः । अकटीत् ।

गुपू रक्षणे ।

कम ऋतो गुपूधूपपणपनो णिङ्ईयङ्आया धुः ॥ ६४ ॥

कमो णिङ् । ऋतेर् ईयङ् । गुपादेर् आयः स्यात्स्वार्थे । तदन्तश्च धुसंज्ञः । गोपायति ।

वारे ॥ ६५ ॥

एभ्य एते वा स्युर् अरे । अगोपायीत् । अगोपीत् । अगौप्सीत् । गोपायामास । जुगोप । एवं धूप ।

तपौ संतापे । औदित्वाद् नेम् । अताप्सीत् ।

चमु अदने ।

ष्ठिवक्लमाचमो ऽपि घः ॥ ६६ ॥

एषां घः स्याद् अपि । आचामति । आङः किम् । चमति । विचमति । मान्तत्वाद् न त्रिः । अचमीत् ।

क्रमु पादविक्षेपे ।

क्रमक्लमभ्रमभ्राशभ्लाशत्रसत्रुटलषयससंयसः श्यन् वा रे घे ॥ ६७ ॥

एभ्यो घे ऽर्थे श्यन् वा स्याद् रे परे । क्रम्यति ।

क्रमः पे ऽपि घः ॥ ६८ ॥

क्रामति ।

स्नुक्रमो ऽमे ऽस्वस इम् ॥ ६९ ॥

आभ्यां वसत्यारस्य इम् स्यात् । न तु मे । अक्रमीत । मान्तत्वाद् न त्रिः । औ यम् उपरमे ।

स्थादाणपाघ्राध्माम्नार्तिदृशशत्सद्गमूइषुयमज्ञानां तिष्ठयच्छपिबजिघ्रधमम-नर्च्छपश्यशीयसीदगच्छेच्छयच्छजाः शिति ॥ ७० ॥

एषामेते क्रमात्स्युः शित परे । यच्छति ।

यमरमनमातः पे सेर् इम् सन् चैषाम् ॥ ७१ ॥

यमादेर् आदन्ताच्च सेर् इम् स्यात् पे तेषां च सन् । अयंसीत् ।

सृवृदृशेति वेन् । येनिथ । ययन्थ । एवं नमौ शब्दनत्योः ।

कृय गतौ । अक्रयीत् । यान्तत्वाद् न त्रिः ।

दल भेदे । व्रतवदेति त्रिः । अदालीत् ।

जि फला विशरणे । फेल्तुः । फेलिथ ।

त्सर् छद्मगतौ । अत्सारीत् ।

ष्ठिवु निरसने । ष्ठिवत्तामेति धैः । ष्ठीवति ।

ष्ठिवूग्रन्थ्योः खेप् ठह्योस् त वा ॥ ७२ ॥

अनयोः खेप् ठकारहकारयोस् तकारो वा स्यात् । तिष्ठेव । ष्ठिष्ठेव ।

ष्ठीव्यात् ।

त्रि ज्ञये ।

त्रेर् गिः सनह्योः ॥ ७३ ॥

त्रेर् गिः स्यात् सनि ह्यां च । त्रिगाय ।

रत्न पालने । प्रनिरत्नति । यान्तत्वाद् न णः ।

ग्रन्थ् व्याती ।

यान्तकृशार्थतन्तः शुर् घे रे ॥ ७४ ॥

आभ्यां रे परे शुः स्याद्वा घे ऽर्थे । ग्रन्थोति । ग्रन्तति । शुधोरित्युव् ।

ग्रन्थुवति ।

ऊदित्वाद् इम् वा । ग्रान्तीत् । स्यादेः सो लोपः ।

षढोः कः से ॥ ७५ ॥

षस्य ठस्य च कः स्यात् सकारे परे । ग्रान्तीत् । ग्रान्तिष्टाम् । ग्रष्टाम् ।

आक्षिषुः । आक्षुः । एवं तक्षू कार्श्ये । कृशार्थः किम् । निर्भर्त्सने संतक्षति ।

णिक्ष चुम्बने । प्रणिक्षति । प्रनिक्षति ।

कृषौ विलेखने ।

कृषमृशस्पृशतृपदृपसृपः सिष् द्यां वा ॥ ७६ ॥

एभ्यः सिर् वा स्याट् द्याम् ।

वर्द् रो ऽकिज्झसे दृशसृजोस् तु नित्यम् ॥ ७७ ॥

कृषादीनामृकारो रः स्याद्वा अकिज्झसे परे । दृशसृजोस् तु नित्यम् । अक्राक्षीत् । अकार्क्षीत् ।

हशषो ऽनिम्इजुङो ऽदृशः सक् द्यां श्लिषस् त्वालिङ्गने ॥ ७८ ॥

अनिम इजुङो हशषान्ताद् दृश्वर्जात् सक् स्याट् द्याम् । श्लिष्यतेस्त्वालिङ्गने ऽर्थे । अकृक्षत् ।

रुष हिंसायाम् ।

वेम् सहलुभभृस्तुशुचवसत्वशरुपरिष्इषोस् तो ऽरस्य ॥ ७९ ॥

एभ्यस् तस्यारस्य इम् स्याद्वा । रोषिता । रोष्टा । एवं रिष हिंसायाम् ।

उष दाहे ।

दरिद्राकासकाशजाग्र्उषो वाम् द्याम् ॥ ८० ॥

एभ्य आम् वा स्याट् द्याम् । भ्वस्क्रन्वाम इति ओषांबभूव । उवोष ।

शश प्लुतगतौ । शशाश । शशशतुः । शशशिथ ।

मिहौ सेचने । हशषो ऽनिमिति सक् । हो ढो भौ । अमिक्षत् । ढ्रोर्ढ्रि र्घश्चानुरिति मेढा ।

दहौ भस्मीकरणे । दादेर्घः । झभान्तस्येति दस्य धः । अधाक्षीत् ।

चह कल्कने । अचहीत् । हान्तत्वाद् न व्रिः ।

शुच शोके । शोचिता । शोक्ता ।

ग्लै हर्षक्षये ।

एचो ऽशित्य् आः ॥ ८१ ॥

धोरेच आः स्याद् अशिति । यमरमेतीम्सनौ । अग्लासीत् ।

णव् आतो डौः ॥ ८२ ॥

आदन्तात्परो णप् डौः स्यात् । जग्लौ ।

उस्य् एचीम्य् अण्व्अराचि लोपः ॥ ८३ ॥

उसि एचि इमि अणोर् अरस्याचि धोरातो लोपः स्यात् । जग्लतुः । जग्लुः । जग्लिथ । जग्लाथ ।

स्यादेर् ङे ऽस्थो वा द्यणौ ॥ ८४ ॥

स्यादेर् आदन्तस्य स्थावर्जस्य ङेः स्याद्वा द्यणौ । ग्लेयात् । ग्लायात् ।

गै शब्दे ।

दामागैह्वाक्पिबसोस्थो ऽरहसे त्व् अयपि ङीः ॥ ८५ ॥

एषां द्यणौ ङेः स्यात् । अरहसे त्व् अणौ यव्वर्जे ङीः स्यात् । गेयात् ।

द्यै संहतौ ध्वनौ । द्यायति ।

दै प् शोधने । पित्वाद् न दासंज्ञा । अदासीत् । दायात् ।

धे ट् पाने । ट ईवर्थः ।

ञिश्रिद्रुस्रुकमो ऽङ् घे द्यां श्विधेट्ध्वन्य्एत्य्अर्द्य्ऊनेस् तु वा ॥ ८६ ॥

ञ्यन्तादिभ्यप् द्याम् अङ् स्याद् घे ऽर्थे । श्व्यादेस्तु वा । धुर्द्विष्यङीति अदधत् । अधासीत् ।

धेशाछासाघ्रः सेः पे लुग् वा ॥ ८७ ॥

अधात् ।

पा पाने । स्थादानेति पिबः । पिबति । भूस्थापिबेति सिलुक् । अपात् । पेयात् ।

घ्रा गन्धोपादाने । जिघ्रति । अघ्रात् । अघ्रासीत् । घ्रेयात् । घ्रायात् ।

ध्मा शब्दाग्निसंयोगयोः । धमति । अध्मासीत् ।

ष्ठा गतिनिवृत्तौ । तिष्ठति । न्यष्ठात् । नितष्ठौ । स्थेयात् ।

म्ना अभ्यासे । मनति ।

दान दाने । प्रणियच्छति । प्रण्यदात् । देयात् ।

ह्वृ कौटिल्ये ।

स्याद्यर्त्यृतो णुर् यङ्यक्ठीढ्यणौ स्कुस् तु ढ्याम् ॥ ८८ ॥

स्यादेर् अर्ते ऋकारस्य णुः स्याद् यङि यकि ठीढ्योर् अणौ च। स्कुस् तु ढ्यामेव । जह्वरतुः ।

नेम् ऋतस् थपो ऽवृस्कुः ॥ ८९ ॥

वृऋस्कृवर्जाद् ऋकारान्तात् थप इम् न स्यात् । जह्वर्थ ।

स्यस्यर्द्हनः ॥ ९० ॥

ऋदन्तहन्तिभ्यां स्यस्य इम् स्यात् । ह्वरिष्यति ।

स्वृ ऊ शब्दोपतापयोः । वेमूदितीम् वा । अस्वारीत् । अस्वार्षीत् । सस्वरिथ । सस्वर्थ ।

सृ गतौ ।

वक्त्यस्यख्यालिपसिचह्वो ङो घे ढ्यां स्रस् तु वा लिब्भ्यस्तु मे ॥ ९१ ॥

वक्त्यादेर् घे ऽर्थे ङः स्याट् ढ्याम् । सृऋभ्यां तु वा । लिपादेस्तु मे वा स्यात् ।

दृश्रोर् णुः ॥ ९२ ॥

दृशेर् ऋवर्णान्तस्य च णुः स्याद् ङे । असरत् । असार्षीत् ।

ऋद् रिः शयग्ढीपे ॥ ९३ ॥

स्रियात् ।

ऋ गतौ । ऋच्छति । आरत् । आर्षीत् । आर । आरतुः । आरुः । आरिथ । अर्यात् ।

श्रु श्रवणे ।

श्रोः श्नुर् घे रे जिश् च ॥ ९४ ॥

श्रुवो घे ऽर्थे श्नुः स्याद् रे परे श्रुवश्च जिः । शृणोति । शृणुतः । शृण्वन्ति ।

नूपो ऽस्यस्योल्लोपो म्वि वा ॥ ९५ ॥

अस्यस्य नोर् उपश् च उकारस्य लोपः स्याद्वा वमोः परयोः । शृण्वः । शृणुवः । शृण्मः । शृणुमः ।

हेर्लोपो ऽस्येति शृणु । शुश्रुव ।

षु गतौ ।

सुस्तुधोः सेर् इम् षे ॥ ९६ ॥

असावीत् । सुषविथ । सुषुविव । सविता । सोता ।

स्रु गतौ । जिश्रीत्यङ् । असुस्रुवत् । सुस्रोथ । सुस्रुव ।

दु गतौ । अदावीत् । अदौषीत् । दुदविथ । दुदुविव ।

द्रु गतौ । अदुद्रुवत् । दुद्रुव ।

गम्लौ गतौ । गच्छति । लित्वाद् ङः । अगमत् । जगाम । हनगमेत्युङ्लोपः । जग्मतुः । जग्मुः । जगमिथ । जगन्थ ।

गमो ऽमे स इम् मार्हात् तु वा ॥ ९७ ॥

गमः परस्य सस्य इम् स्यात् । न तु मे । मयोग्यात्तु वा । गमिष्यति ।

सृप्लौ गतौ । अस्राप्सीत् । असाप्सीत् । असृपत् ।

स्कन्दिरौ गतिशोषणयोः ।

विस्कभ्नानिर्वविसुनिर्दुःस्वपः सः षो निनिर्विस्फुरस्फुलपरिविस्कन्दाप्राणिधनिपरिनिर्व्यभ्यनुस्यन्दस् तु वा ॥ ९८ ॥

विस्कभ्नातेर् ववर्जव्यादिपूर्वस्य स्वपश्च सः षः स्यात् । न्यादिपूर्वस्फु-

रस्फुलोः परिविस्कन्दतेर् अप्राणिघन्यादिपूर्वस्य स्यन्दतेश्च वा स्यात्।
परिष्कन्दति । परिस्कन्दति ।
तॄ प्लवनतरणयोः ।

ॠतो णुः किति ढ्याम् ॥ ९९ ॥
तेरतुः

वॄतो वेनो र्घो ऽठीढीपसेः ॥ १०० ॥
वृङो वृञ ॠकारान्ताच्च इमो र्घः स्याद्वा । न तु ढ्या ढ्याः पसेश् च ।
तरिता । तरीता । ठीढीपसेस्तु तेरिथ । तरिषीष्ट । अतारिष्टाम् ।

ॠद् इर् अणाव् उर् त्वोष्ठ्यात् ॥ १०१ ॥
ॠकार इर् स्याद् अणौ । ओष्ठ्यात्परस्तु उर् । तीर्यात् ।
पन्जौ सङ्गे ।

सन्जदन्शस्वन्जो ऽपि नलोपः ॥ १०२ ॥
निषजति । न्यषाङ्क्षीत् । निषषञ्ज । ससजतुः । ससञ्जतुः ।
दृशिरौ प्रेक्षणे । पश्यति । वर्द्रो ऽकिदिति ॠद् रः । अदर्शत् । अद्राक्षीत् ।
सृजदृशेतीन् वा । ददर्शिथ । दद्रष्ठ ।
दन्शौ दंशने । दशति । अदाङ्क्षीत् ।
कित निवासे रोगापनयने संशये च ।

कित्तिज् गुपः सन् नेम् मानशानदानवधस्तु खेर् ङी च ॥ १०३ ॥
कितादेः सन् स्यात् । इम् न स्यात् । मानादेस्तु खेर् ङी च ।

क्रमादेते ऽत्र संदेहे क्षान्तिनिन्दाविचारणे ।
निशानार्जवनिन्दासु रुग्जये ऽपि कितो मतः ॥

सन्ज्यादिर् धुः ॥ १०४ ॥
सन्नन्तो ज्याद्यन्तश्च धुसंज्ञः स्यात् ।

सन्यङन्तो द्विः ॥ १०५ ॥

चिकित्सति । अचिकित्सीत् । चिकित्सामास ।

॥ इति पवत्पादः ॥

एध ङ् वृद्धौ । एधते । ऐधिष्ट । एधांचक्रे ।

दद ङ् दाने । अशशददेत्युक्तेर् ददद ।

घक्क ङ् गत्याम् । अद्यैघक्केत्युक्तेः घक्कते । पघक्के ।

ऋज ङ् गतिस्थैर्ये । आनृजे ।

तिज ङ् क्षमानिशानयोः । तितिक्षते ।

घञ्जौ ङ् सङ्गे । निघञ्जते ।

निविपरिस्वञ्जस् तु सुमादेः सः षो ऽमि वा ॥ १०६ ॥

न्यघङ्क्त । न्यस्वङ्क्त । सस्वजे । सस्वञ्जे ।

सत्स्वञ्जोष् ठ्यां नाखेः ॥ १०७ ॥

खिवर्जस्यानयोः सः षो न स्याट् ठ्याम् । विषस्वजे । विषस्वञ्जे ।

त्रपू षङ् लज्जायाम् । अत्रपिष्ट । अत्रप्त । त्रेपे ।

जभ ङ् मैथुने ।

नुण् जभो ऽचि ॥ १०८ ॥

अजम्भिष्ट ।

ष्टुभ ङ् स्तम्भे । विष्टोभते । व्यष्टोभिष्ट ।

पण ङ् व्यवहारे स्तुतौ च । कम ऋत इत्यायः । पणायते ।

सनः पने धोर् वा त्व् आयात् ॥ १०९ ॥

पणायति । पणायते । अपणायिष्ट । अपणिष्ट । पणायांचक्रे । पेणे ।

अपणीत् ।

विछास्तुतिपणो वायः ॥ ११० ॥

पणायते । पणाते । एवं पन ङ् ईडे ।

कमु ङ् कान्तौ । कामयते । ज्यन्तत्वाद् अङ् ।

ज्यअङ्य् उङः स्वो ऽनग्लोपिशास्वृदितः ॥ १११ ॥

अग्लोपिनः शासोर् ऋकारेतश्चान्यस्य उङः स्वः स्याज् ञेः परे ऽङि ।

खेः सन्वद् घौ घोर् हसादे र्घश् च त्यनेकाचोस् त्व् अकलिहलेर्वा ॥ ११२ ॥

अनग्लोपिनः खेर् घौ ध्वक्षरे परे सन्वत् कार्यं स्याज् ज्यङि । घोश् च खेर् हसादे र्घः स्यात् । कलिहलिवर्जस्य लेर् अनेकाचश्च सन्वद् वा स्यात् ।

ख्य्अस्येत् सनि ॥ ११३ ॥

खेर् अवर्णस्य इत् स्यात् सनि परे ।

ञेर् लोपो ऽनाल्विल्वाप्यान्तेत्वामिम्शिति ॥ ११४ ॥

आलु इष्णु आप्य अन्त इत्नु आम् इम् शित् । एभ्यो ऽन्यत्र ञेर् लोपः स्यात् । अचीकमत । अचकमत । कामयांचक्रे । चकमे ।

अय ङ् गतौ । आयिढ्वम् । आयिध्वम् । आयिढ्वम् । अयांचक्रे । एवं ञि दय ङ् ग्रहणे गतौ दाने वधे च ।

स्फायी ङ् वृद्धौ । अस्फायिष्ट ।

य्वोर् लोपो हस्य् अये ॥ ११५ ॥

यकारवकारयोर् लोपः स्याद् हसि । न तु ये । अस्फास्त ।

ओ प्यायी ङ् वृद्धौ ।

पदस् तनीण् घे प्यायतायदीपपूरजनबुधस् तु वा ॥ ११६ ॥

पदो घे ऽर्थ् इण् स्यात् तनि । प्यायादेस्तु वा ।

इणस् तन्लोपः ॥ ११७ ॥

अप्यायि ।

अप्यायिष्ट । अप्यास्त ।

प्यायः पीर् यङ्ठ्योः ॥ ११८ ॥

पिप्ये ।

तायृ ङ् संतानपालनयोः । अतायि । अतायिष्ट ।

शल ङ् चलने स्तुतौ च । अशलिढ्वम् । अशलिध्वम् । अशलिढ्वम् ।

षेवृ ङ् सेवने । परिषेवते । न्यषेविष्ट । विषिषेवे । प्रतौ तु प्रतिसेवते ।

काशृ ङ् दीप्तौ । काशामास । चकाशे । एवं कासृ ङ् कुशब्दे ।

ईह ङ् चेष्टायाम् । ऐहिढ्वम् । ऐहिध्वम् । ऐहिढ्वम् ।

रु ङ् वधे गत्याम् । अरविष्ट । अरोष्ट । रुरुविषे ।

दे ङ् पालने ।

द्वेर् देङो दिगिष् ठ्याम् ॥ ११९ ॥

दिग्ये ।

ओ डी ङ् य नभोगतौ । अडयिष्ट ।

गुपू ङ् गोपनकुत्सनयोः । जुगुप्सते ।

मान ङ् विचारे । मीमांसते ।

वध ङ् निन्दायाम् । बीभत्सते ।

द्युत ङ्ल दीप्तौ । शासलिद्द्युदिति ङः । तेनैव पम् । अद्युतत् । अद्योतिष्ट ।

द्युत्स्वाप्योः खेर् जिः ॥ १२० ॥

दिद्युते ।

वृतु ङ् व्लृ वर्तने ।

वृद्भ्यो नेम् पे स्यसनोर् वा त्व् अमे ॥ १२१ ॥

वृतादेः स्यसनोर् इम् न स्यात् पे । माद् अन्यत्र तु वा । अत एव पम् । वर्त्स्यति । मे तु वर्तिष्यते ।

स्यन्दू ङ् क्षरणे । निष्यन्दते निस्यन्दते घृतम् । निस्यन्दते हस्तीति प्राणिघत्वाद् न षः ।

कृपू ङ् वॢ कल्पने ।

कृपः क्लृपो ऽकृपादौ ॥ १२२ ॥

कृपः स्थाने क्लृपः स्यात् । न तु कृपादौ । कल्पते ।

नेम् पे द्याः ॥ १२३ ॥

कृपो द्या इम् न स्यात् पे । अत एव पम् । कल्प्ता । पे किम् । कल्पिता । कल्प्ता । कल्पिष्यते । कल्प्स्यते ।

व्यथ प म ङ् पीडायाम् ।

व्यथग्रहज्यावयव्यधवशव्यचप्रछव्रश्चभ्रस्जस्वपवचयजादेः खेर् जिप् द्याम् ॥ १२४ ॥

एषां खेर् जिः स्याट् द्याम् । विव्यथे ।

जि त्वरा प म ङ् स्यदे । अत्वरिढ्वम् । अत्वरिध्वम् । अत्वरिद्ध्वम् ।

॥ इति मवत्पादः ॥

पत्लृ ज गत्यैश्वर्ययोः ।

वच्यस्यश्चिपतां वोचस्थश्चपप्ता ङे ॥ १२५ ॥

एषामेते क्रमात्स्युर् ङे । प्रण्यपप्तत् ।

ण ज टु वम उद्गिरणे । वेमतुः । ववमतुः । वेमिथ । ववमिथ ।

भ्रमु ज ण चलने । क्रमक्लमेति श्यन् वा । भ्रम्यति । भ्रमति । भ्रेमतुः । बभ्रमतुः ।

षह ज ङ् शक्तौ । व्यषहत । व्यसहत । वेम् सहेतीम् वा । परिषहिता ।

सहवहो ऽद् ओ ढि ॥ १२६ ॥

सहवहोर् अकारस्य ओत् स्याड् ढे परे । निसोढा । ओत्वाद् न षः ।

षद्लृ जौ विषादे शरणे गतौ। निषीदति। न्यषदत्। निषसाद। प्रतेस्तु प्रतिसीदति।

शद्लृ जौ शाते।

शदो ऽपि मम्॥ १२७॥

शीयते। अशदत्।

फण मि ण गतौ। फेणतुः। पफणतुः। फेणिथ। पफणिथ।

राजृ ञ् ण दीप्तौ। रेजतुः। रराजतुः। रेजिथ। रराजिथ। रेजे। रराजे।

विधिबलाद् आतो ऽप्य् एत्वम्।

टु भ्राशृ ङ् ण दीप्तौ। भ्राश्यते। भ्राशते। भ्रेशे। बभ्राशे। एवं टु भ्लाशृ ङ् ण भासि।

स्वन ण शब्दे। विष्वनति अवष्वनति मांसम्। व्यष्वनत्। विष्वेनतुः। विषष्वनतुः। विस्वनति वीणा। निस्वनत्यन्नम्। अन्नव्यवेत्युक्तेर्न षः।

खनु ञ् विदारे। हनगमेत्युङ्लोपः। चख्नतुः। चख्ने।

खनसनजनां ङा क्तसे ये तु वा॥ १२८॥

खायात्। खन्यात्।

चायृ ञ् निशाने ऽर्चे। अचायीत्। अचासीत्। य्वोर्लोप इति।

लष ञ् स्पृहायाम्। लष्यति। लषति।

गुहू ञ् संवृतौ।

गुहो णोर् ऊः॥ १२९॥

गुहो णोर् ऊः स्यात्। गूहति। गूहते। अगूहीत्। अघुक्षत्।

गुहदुहदिहलिहां टीमदन्त्ये न सिः सग् वा॥ १३०॥

एषां टीमदन्त्ये परे सिर् न स्यात्। सक् च वा स्यात्। अगूढ। अघुक्षत।

सको ऽल्लोपो ऽच्य् अव्वे॥ १३१॥

सको ऽकारस्य लोपः स्याद् अव्वे ऽचि परे । अगूहिषि । अघुक्षि ।
अगुह्वहि । अघुक्षावहि । दत्त्ये किम् । अगूहिष्महि । अघुक्षामहि ।
अव्वे किम् । अगूहिषत । अघुक्षन्त ।
हृ ञ् हरणे ।

इगुङुर् मढीस्य् अनिम् किद् गमस्तु वा ॥ १३२ ॥

इगुङ ऋवर्णान्ताच्च परा मे स्थितानिम् ढी सिश् च कित् स्यात् । गमस्तु वा । अहृत । अहृषाताम् । हृषीष्ट ।
टु डु भृ ञ् भृतिपुष्ट्योः । बभृव ।
दान ञ् आर्जवे छिदि । दीदांसति । दीदांसते । एवं शान ञ् तेजे ।
शीशांसति ।
भजौ ञ् भागसेवयोः । भेजे । भेजिथ । बभक्थ ।
श्रि ञ् सेवायाम् । ञिश्रीत्यङ् । अशिश्रियत् । श्रयिता ।
रन्ज मौ ञ् रागे ।

रन्जो ऽपपकानासघ्निनौ नलोपो जौ तु मृगरमणे ॥ १३३ ॥

रजति । रजते । ररजतुः । ररञ्जतुः ।
त्विषौ ञ् कान्तौ । अत्विक्षत् । त्विक्षीष्ट ।
यजै जौ देवार्चादानसंगकृतौ । व्यथग्रहेति जिः । इयाज ।

ग्रहस्वपाद्योः कङित्कितोर् जिः ॥ १३४ ॥

ग्रहादेः किति ङिति स्वपादेः किति जिः स्यात् । ईजतुः । ईजुः । इयजिथ । इयष्ठ ।
ड्वै वपौ ञ् मुण्डवीजोप्त्योः । प्रण्युवाप ।
वहौ जै प्रापणे । प्रण्यवाक्षीत् । अवोढ । उवाह । ऊहे ।
वे जै स्यूतौ ।

58100

ठ्यां न वेप्रछाम् ॥ १३५ ॥

वेञ प्रछिव्रश्चिभ्रस्जीनां जिर् न स्याट् ठ्याम् । ववौ । ववतुः ।

वेञो वय वा ॥ १३६ ॥

वेञो वयः स्याद्वा ठ्याम् । उवाय । ऊयतुः ।

य वः किति ॥ १३७ ॥

वेञो यस्य वः स्याद्वा ठ्यां किति । ऊवतुः ।

व्ये ञै वृतौ ।

ना व्येप् ठ्याम् ॥ १३८ ॥

व्येञ आ न स्याट् ठ्याम् । विव्याय ।

जिं वान्त्यः किति ॥ १३९ ॥

द्वेर् व्येञो ऽन्त्यो भागो जिं वा प्राप्नोति ठ्यां किति । विव्यतुः । विव्ययतुः । विव्ययिथ ।

ह्वे ञै स्पर्धायां शब्दे च । अह्वत् । अह्वत । अह्वास्त ।

ह्वो द्वेर् जिः ॥ १४० ॥

द्वेर् ह्वेञो जिः स्यात् । जुह्वाव । जुहुवतुः । जुहुवुः ।

ऐ वसौ निवासे ।

स त् स्य् अरे ॥ १४१ ॥

सस्य त स्याद् अरे से परे । अवात्सीत् । अवात्ताम् । उवास । ऊषतुः ।

वदै वाचि । अच्छवदति । व्रजवदेति व्रिः । अवादीत् । उवाद । ऊदतुः ।

ट्वायो श्वीर् गतिवृद्धौ । शासलिद्युदिति ङः । अश्वत् । ञिश्रीत्यङ् वा । अशिश्वियत् । अश्वयीत् ।

श्वेर् जिर् वा यङ्ठ्योर् ज्यङ्सनोः ॥ १४२ ॥

श्वेर् जिर् वा स्याद् यङि ठ्यां जेः परे ऽङि सनि च । शुशाव । शिश्वाय । शुशुवतुः । शिश्वियतुः । शुशुवुः । शिश्वियुः । श्वयिता । शूयात् ।

॥ इति मिश्रपादः ॥

॥ इति भ्वाद्यध्यायः ॥ ८ ॥

अद् लौ भक्षणे ।

लुग् अद्भ्यो ऽपः ॥ १ ॥

अदादेः परस्यापो लुक् स्यात् । अत्ति ।

ङ्क्सो हेर् धिः ॥ २ ॥

होर् क्सात् च परस्य हेर् धिः स्यात् । अद्धि ।

हस्अद्भ्यां दिसेर् लोपामौ ॥ ३ ॥

हसात् परयोर् दिस्योर् लोपः स्यात् । अदः परयोर् अन् स्यात् । आदत् । आदः ।

घस्ल् अदः सन्ट्यल्घञि ॥ ४ ॥

अदो घस्लृ स्यात् सनि ट्यान् अलि घञि च । लित्वाद् ङः ॥ अघसत् ।

ठ्यां वा ॥ ५ ॥

जघास । आद । हनगमेत्युङ्लोपः । जक्षतुः । आदतुः । जक्षुः । आदुः ।

नेमसुमिति जघसिथ । आदिथ ।

प्सा ल भक्षणे । प्रणिप्साति ।

द्विषविदातो ऽन् उस् वा ॥ ६ ॥

द्वेष्टेर् वेत्तेर् आदन्ताच्च परो ऽन् उस् स्याद्वा । अप्सुः । अप्सान् ।

वश् ल कान्तौ । वष्टि । ग्रहस्वपाद्योरिति जिः । उष्टः । उशन्ति । अवट् । उवाश । ऊशतुः ।

कृन् लौ हिंसागत्योः ।

वनतनाद्यनिमां जनूलोपो कसयप्य् अतिवय् अणौ ॥ ७ ॥

एषां जनूलोपः स्याद् अणौ कसे यपि च । न तु तिकि । प्रणिकृतः ।

कृनो क्रे घ्र इति घ्रन्ति । प्रकृणवः । प्रकृन्वः । प्रकृणमः । प्रकृन्मः ।

त्रक्ष् एधि शाधि कृन्य् अस्ति शास्ति क्रिना ॥ ८ ॥

एषां क्रियुक्तानां क्रनादेते स्युः । त्रक्ष्टि ।

कृनो वधय् टीबलि टीमे तु वा ॥ ९ ॥

कृनो वधः स्याद् ल्यो बाम् अलि च । टीमे तु वा । अवधीत् ।

खेर् हो घो जृणाति च ॥ १० ॥

खेः परस्य कृनो कृस्य घः स्याज् जिति णिति च । जघान । जघ्नतुः ।

कृत्वा । वध्यात् । प्रकृणिष्यति ।

यु ल अमिसर्पणे ।

रपिद्कृन्य् उतो ऽद्वेर् त्रिः ॥ ११ ॥

अद्वेर् धोर् उकारस्य त्रिः स्यात् पिति कृसे रे । यौति । युतः । यु-

वन्ति ।

यु ल मिश्रणे ऽमिश्रणे च । यौति । यवित्वा ।

णु ल स्तुतौ । अनावीत् । अनौषीत् । नुनुविव ।

क्षणु ल तेजने । क्षणवित्वा ।

क्षु ल प्रत्नरणे स्तुत्याम् । क्षुक्रमो ऽम इतीम् । अक्षावीत् ।

इ णा ल गतौ ।

य् इणो ऽच् अणौ ॥ १२ ॥

इणो यः स्याद् अणावू अचि । यति ।

गा ल्याम् ॥ १३ ॥

इणो गा स्याद् ल्याम् । अगात् ।

इयाय ।

खेः किति र्घिः ॥ १४ ॥

इणः खे र्घिः स्यात् किति ङ्याम् । ईयतुः ।

अगेर् ङ्याम् ॥ १५ ॥

अगेर् इणो र्घिः स्यात् किति ङ्याम् । ईयात् । अगेः किम् । अन्वियात् ।

अधी कृ ल स्मरणे ।

इणवदिकः ॥ १६ ॥

इण इव इकः कार्यं स्यात् । इषं च तद्वत् ।

या ल गतौ । प्रणियाति । एवं वा ल गमनक्षिप्तयोः ।

द्रा ल स्वप्ने पलायने च ।

ख्या ल ख्यातौ कथने । अख्यत् ।

ना ल च माने । प्रणिनाति । मेयात् ।

विद् ल ज्ञाने ।

वेत्तेः कीपं ठीपं वा ॥ १७ ॥

विदः परस्य वयाः परस्य ङ्याः पं स्याद्वा । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे तुगागमः ।

ङान् वा ङ्यां ग्यां तु कृ ञनु ॥ १८ ॥

वेत्तेष् ङ्यां ङान् वा स्यात् । ग्यां तु कृञ एवानुप्रयोगः ।

तन्यः प्रुप् रे वे ॥ १९ ॥

विदांकरोतु । वेतु ।

कृञो ऽद् व् अणौ रे ॥ २० ॥

कृञो ऽकारस्य उः स्याद् अणौ रे परे । विदांकुरुताम् । वित्ताम् ।

अविदुः । अविदन् ।

घ्यां सौ रे वा दृघोः ॥ २१ ॥

दृघो रेफः स्याद्वा सौ ङ्याम् । अवेः । अवेद् ।

अवित्तम् । अवित्त । विदांबभूव । विवेद ।

अस ल भावे ।

लोपो ऽस्त्य्असोर् ङिद्रसोर् अघ्याम् ॥ २२ ॥

अस्तेर् अकारस्य ङिति रे सस्य च से लोपः स्यात् । न तु घ्याम् ।

स्तः । सन्ति । असि ।

एधि । आसीत् । आस्ताम् ।

भूर् अरे ॥ २३ ॥

अस्तेर् भूः स्याद् अरे । अभूत् ।

प्रादुर्गीकः सः षो ऽच्ये ॥ २४ ॥

प्रादुःषन्ति । प्रादुःष्यात् । निषन्ति ।

मृजू ल प शुद्धौ ।

मृजो ऽकङिति व्रिर् वा त्व् अच्य् अणौ ॥ २५ ॥

अकङिति मृजो व्रिः स्यात् । अणाव् अचि तु वा । मार्ष्टि । मृष्टः ।

मार्जन्ति । मृजन्ति ।

वच् लौ वाचि । वच्यस्यश्विषतामिति वोचः । अवोचत् । उवाच । ऊ-

चतुः । ऊचुः ।

रुदिर् ल घ रोदने ।

रुद्भ्यो ऽयो ह्रस्रस्येम् ॥ २६ ॥

रुदादेः परस्यायस्य ह्रसस्य रस्य इम् स्यात् । रोदिति । रुदितः । अयः

किम् । रुद्यात् ।

दिस्योर् अम् वा ॥ २७ ॥

रुदादेः परयोर् दिस्योर् अम् स्याद्वा । अरोदत् । अरोदीत् । अरोदः

अरोदीः ।

ञि ष्वपौ घ लु शये । विस्वपिति । सवत्वाद् न षः । विसुष्वाप । दुः-
षुषुपतुः । निर्वत्वात् षः ।

श्वस घ लु प्राणने । श्वसिति । अश्वसीत् । क्षणादित्वाद् व्रिः ।

अन घ लु प्राणने । प्राणिति । प्रानिति ।

जक्ष क्ष लु घ भक्षहासयोः । जक्षिति ।

अन्तो ऽद् द्वेः ॥ २८ ॥

द्वेः परस्यान्तो ऽत् स्यात् । जक्षति । अनुस् सिद्धेः । अजक्षुः ।

जागृ क्ष लु जागरणे ।

णुर् उस्य् अद्यान् ॥ २९ ॥

द्वेर् उसि परे णुः स्यात् । न तु द्यान् । अजागरुः । अजागः । अजागरीत् ।
जागरामास । जजागार ।

जाग्रो ऽणाव्वीण्ङिति क्वसुकाने तु वा ॥ ३० ॥

जागर्तेर् णुः स्यात् । न तु णापि वौ इणि ङिति च । क्वसौ काने तु
वा । जजागरतुः ।

दरिद्रा क्ष लु दुर्गत्यान् ।

दरिद्रो ङिर् हस्रे ऽणौ हाग्भ्योस्तु वा ॥ ३१ ॥

दरिद्रातेर् ङिः स्याद् अणौ हसे रे परे । हाग्भ्योस् तु वा । दरिद्रितः ।

श्चाद्योर् आ लोप्यो ऽणौ हसे त्व् य् अदः ॥ ॥ ३२ ॥

श्चा इत्यत्य द्वेश् च आलोपः स्याद् अणौ । हसे तु दावर्जन् ई स्यात् ।
दरिद्रति ।

दरिद्र आलोपो ऽसन्अकाने ऽरे ट्यां तु वा ॥ ३३ ॥

दरिद्र आलोपः स्याद् अरे । न तु सनि अके अने च । ट्यां तु वा
अदरिद्रीत् । अदरिद्रासीत् ।

दरिद्रामास । ददरिद्र । दरिद्र्यात् ।

चकासृ ल लु दीप्तौ । ऊकारो वेर्थः । कपकारोरिति सस्य दः । चकाद्धि । धे सलोप इति चकाधि ।

घ्यां दौ त सः ॥ ३४ ॥

घ्यां दौ परे सस्य तः स्यात् । अचकात् ।

सौ वा ॥ ३५ ॥

अचकात् । अचकाः ।

शासु ल लु शासने ।

शासूडङ् इड् क्सङे ऽणौ धौ व् आशासश्च ॥ ३६ ॥

शासेर् उङ् इत् स्याद् अणौ क्से ङे च । धौ तु शास आशासश्च । शिष्टः । शाधि । अशिषत् ।

चक्ष ङ् ल वदे । चष्टे ।

चक्षः क्शाञ् ख्याञ् अरे ऽत्यागेऽसुअसुअने ॥ ३७ ॥

चक्षः क्शाञ् ख्याञ् स्याद् अरे । न तु वर्जने उसि असि अने च । अक्शासीत् । अक्शास्त । अख्यत् । अख्यत । त्यागे तु । समचक्षिष्ट ।

ध्यां वा ॥ ३८ ॥

चक्शे । चख्ये । चचक्षे ।

ईड ङ् ल स्तुतौ । ईट्टे ।

सध्वो स्स्येम् ज्ञनीडीशः ॥ ३९ ॥

ज्ञ्यः परस्य स्स्य सस्य ध्वस्य च इम् स्यात् । ईडिषे । ईडिध्वे ।

आस ङ् ल उपवेशने । आस्ते । विज्ञादीत्याम् । आसांचक्रे ।

वस ङ् ल स्तृतौ । वसिता । वस्ता ।

णिसि ङ् ल चुम्बने । प्रणिंस्ते । प्रनिंस्ते ।

षू ङ् ल सूतौ । सूते ।

सूतेर् न गुर् ण्याम् ॥ ४० ॥

सुवै । वेनूदितौन् वा । असविष्ट । असोष्ट ।

शी ङ् ल ञि शयने ।

शीङो रे णुः ॥ ४१ ॥

शेते । शयाते ।

मालो ल्न् विदस्तु वा ॥ ४२ ॥

शीङः परस्य मन्यालो ल्न् स्यात् । वेत्तेस्तु वा । शेते ।

अशयिष्ट ।

अधी ङ् ल अध्ययने । अधीते ।

गीङ्ष् टीध्योर् वा ॥ ४३ ॥

इङो गीः स्याद्वा टीध्योः परयोः । धैत्वाद् न णुः । अध्यगोष्ट । अध्यैष्ट ।

ह्यां गा ज्यङ्सनोस् तु वा ॥ ४४ ॥

इङो गाः स्याद् ह्यान् । जेः परे ऽङि सनि च वा । अधिजगे ।

अध्यगीष्यत । अध्यैष्यत ।

दीधी ङ् ल लु दीप्तौ ।

दीधीवेव्योर् न णुः ॥ ४५ ॥

दीध्यै ।

लोप्यो ऽलो यूयोः ॥ ४६ ॥

दीधीवेव्योर् अलो लोप्यः स्याद् यकारेवर्णयोः परयोः । अदीधिष्ट ।

एवं वेवी ङ् ल लु कान्तिगतिव्याप्तिक्षेपप्रजनाद्यादने च ।

द्विषो ञ् ल वैरे । द्विषविद्रातो ऽनुस् वा । अद्विषुः । अद्विषन् । अद्विष्ट ।

अद्विक्षत ।

डुक्ष्णो ञ् ल डुक्षि । अधुक्षत् । अधुक्षत । अडुक्ष । एवं दिक्ष्णो ञ् ल

लिपि । प्रणिदेक्षि । अधिक्षत् ।

ऊर्णु ञ् ल आच्छादने ।

वोर्णोः पिद्हस्रे णुः ॥ ४७ ॥

ऊर्णोर् णुः स्याद्वा पिति हसे रे परे । ऊर्णोति । ऊर्णौति । रपिद्ध-स्युत इति व्रिः ।

घ्यान् ॥ ४८ ॥

ऊर्णोर् णुः स्यात् पिति हसे घ्यान् । और्णोत् ।

णूव्व्रिप् ढ्यान् ॥ ४९ ॥

ऊर्णोर् णु उव् व्रि एते स्युप् ढ्यान् । और्णवीत् । और्णुवीत् । और्णा-वीत् ।

नाजन्तादेर् आदिर् द्विः ॥ ५० ॥

अन्तादिस्थिताचो धोर् आदिर् द्विर् न स्यात् ।

स्यादौ नवद्रो ऽये ॥ ५१ ॥

स्यादौ स्थिता नवदरा द्विर् न स्युः । न तु ये । ऊर्णुनाव ।

ङिद् इन् वोर्णोः ॥ ५२ ॥

ऊर्णोः पर इन् ङित् स्याद्वा । ऊर्णुविता । ऊर्णविता ।

ष्टु ञ् ल स्तुतौ ।

पिद्हस्रस्येन् ब्रुवो यङ्लुग्रुतुस्तोस् तु वा ॥ ५३ ॥

ब्रुवः परस्य पितो हसो रस्य ईन् स्यात् । यङ्लुगादेस्तु वा । स्तवीति । स्तौति । अभिष्टौति ।

सुस्तुधोरितीन् । न्यष्टावीत् । न्यस्तावीत् । अस्तोष्ट । तुष्टुव । स्तवि-ता । स्तोता ।

टु क्षु ल क्षुतौ । क्षविता ।

रु ल ध्वनौ । रवीति । रौति । रुरुविव । रविता । रोता ।

तु ल वृत्तिहिंसापूर्तिषु । तवीति । तौति । तविता । तोता ।

ब्रू ञ् ल उक्तौ । ब्रवीति ।

पञ्च तिप् पञ्च णत्र् वाहश्च ॥ ५४ ॥

ब्रुवः परेषां पञ्चानां तिबादीनां स्थाने पञ्च णत्रादयो वा स्युः। ब्रुवश्चाहः स्यात्। आह। आहतुः। आहुः।

हस् त थि ॥ ५५ ॥

आहो हस्य तः स्यात् थे परे। आत्थ। आहथुः।

पक्षे सुगमम्।

वचो ऽरे ॥ ५६ ॥

ब्रुवो वचः स्याद् अरे। अवोचत्। उवाच। ऊचे।

ङ लि होमे ऽदने।

ह्वादी रे द्विः ॥ १ ॥

जुहोति।

ह्वो व् अच्य् अणौ ॥ २ ॥

होर् उकारस्य वः स्याद् अणाव् अचि रे। जुह्वति। जुहुधि।

पशाम् वा भीह्रीभृहोप् ढ्याम् ॥ ३ ॥

एभ्यः पशाम् वा स्याट् ढ्याम्। जुहवामास। जुहाव।

ञि भी लि भये। बिभेति। दरिद्रो ङिरिति ङिः। बिभितः। बिभीतः।

बिभ्यति। बिभयामास। बिभाय।

ह्री लि लज्जायाम्। जिह्रयामास। जिह्राय।

पृ लि पालनपूरणयोः।

पृभ्रादेर् ङिः खे रे ॥ ४ ॥

पृ ऋ भृञ् माङ् हाङ्। एषां खेर् ङिः स्याद् रे। पिपर्ति।

पू र्घो वा ॥ ५ ॥

पिपूर्तः। पिपृतः। पप्रतुः। पपरतुः। णुमत्वाद् न एः।

ओ हा क लि त्यागे । जहाति । जहितः । जहीतः । जहति ।

हाको ऽन्तलोपः ख्यान् ॥ ६ ॥

जह्यात् ।

हौ ङा वा ॥ ७ ॥

जहाहि । जहिहि । जहीहि । हेयात् ।

ऋ लि गत्याम् । इयर्ति । ऐयरुः ।

जन् न लि र जनने । जज्ञिषे । जज्ञिध्वे ।

णिजिरौ ञ् लि पोषे ।

निजां खे रे णुः ॥ ८ ॥

निजविजविषां खेर् णुः स्याद् रे । नेनेक्ति । नेनिक्तः ।

न द्व्युङो ऽचि ॥ ९ ॥

द्वेर् उङो णुर् न स्याद् अचि परे । नेनिजानि । रे किम् । निनेज ।

एवं विजिरौ ञ् लि पृथग्भावे ।

विषि लि ञौ व्याप्तौ । अविषत् । अविक्षत् ।

डु दा ञ् लि दाने । प्रणिददाति । अद इत्युक्तेरालोपः । दत्ते ।

द्व्योर् दाधोर् दे धे हौ ॥ १० ॥

द्वेर् दाञो द्वेर् धाञो देर् धेश् च स्याद् हौ । देहि ।

स्थादोर् ङिप् टीमे न णुः ॥ ११ ॥

स्थादोर् ङिः स्याट् टीमे । तस्य च णुर् न स्यात् । अदित । अदिषाताम् ।

डु धा ञ् लि धारणे पुष्टौ दाने च । प्रणिदधाति ।

धो द धो ऽन्तलोपे त्थि ॥ १२ ॥

धाञो दस्य धः स्यात् तथयोः परयोरन्तलोपे सति । धत्ते ।

धेहि । अधित ।

डु डु भृ ञ् लि भृतिपुष्योः । बिभर्ति । बिभृतः । बिभरामास । बभार ।

मा ङ् लि शब्दे । प्रणिमिमीते । मिमाते । मिमते । एवम् ओ हा ङ् लि गतौ ।

॥ इत्यदादिपादः ॥ १० ॥

दिव् यु क्रीडायाम् ।

दिवसुतुदरुधक्र्यादेर् यन्न्वनण्नाः शिद् घे रे ॥ १ ॥

एभ्यो घे ऽर्थे यन् नु अ नण् ना एते रे परे क्रमात्स्युः । ते च शितः । दीव्यति ।

षिव् यु तन्तुसंतौ । निषीव्यति । न्यषेवीत् । न्यसेवीत् ।

नृत् यी नर्तने ।

नृत्कृत्चृत्छृत्तृदो ऽरसो ऽसेर् इम् वा ॥ २ ॥

एभ्यः परस्यारस्य सिवर्जस्य सस्य इम् स्याद्वा । नर्तिष्यति । नर्त्स्यति । सौ तु अनर्तीत् ।

त्रसी य उद्वेगे । क्रमक्लमेति श्यन् वा । त्रस्यति । त्रसति । तत्रास । त्रेसतुः । तत्रसतुः ।

जॄ इर् ष म य ज्यानौ । जीर्यति । अजरत् । अजारीत् । जेरतुः । जजरतुः । जरीता । जरिता ।

शो य निशाने ।

यन्य् ओशमादिमिदो लोपर्घणुः ॥ ३ ॥

ओकारस्य लोपः शमादे र्घो मिदेर् णुः स्याद् यनि घे । श्यति । अशात् । अशासीत् । एवं क्षो य लूनौ ।

षो य नाशे । प्रणिष्यति । न्यषात् । न्यषासीत् । सेयात् ।

दो य छेदे । प्रण्यदात् । देयात् ।

राध् यौ सन्सिद्धौ । रेधतुः । रराधतुः । वधार्थः किम् । आरराधतुः ।

व्यध् यौ ताडने । विध्यति । विव्याध । विविधतुः ।

पुष् यौ ऌ पुष्टौ । शासलिद्व्युत्पुषादेर्ङ्टीप इति ङः । अपुषत् ।

श्लिष् यौ ञि ऌ श्लेषे । अश्लिषत् । आलिङ्गने तु अश्लिक्षत् ।

रध् यू ऌ हिंसने पाके ।

नुण् रधो मुचां नशमस्जो रभलभो ऽनठीमच्य् ए ऋस्य् अरठ्यचि ॥ ४ ॥

रधप् ठीवर्जेन्वर्जे ऽचि । मुचादेर् अत्ये । नशमस्जोर् ऋसे । रभलभो रठीवर्जे ऽचि नुण् स्यात् । अरन्धत् । रधिता । रद्धा । ठ्यां तु ररन्धिव । ररन्धिम । रेध्व । रेध्म ।

तृप् यू ञि ऌ प्रीणने । अतर्पीत् । अत्राप्सीत् । अताप्सीत् । अतृपत् ।

एवं दृप् यू इर् ञि हर्षाहंकारयोः ।

मुह् यू ञि ऌ वैचित्त्ये । मोहिता । मुहां घङ्वा भौ । मोग्धा । मोढा ।

णश्ऌ यू नाशे ।

नश नेश वा ङे ॥ ५ ॥

प्राणेशत् । प्राणशत् । नशिता । प्रनङ्ग्धा । प्रनंष्टा । अशान्तत्वाद्न णः ।

शमु भ्य इर् उपशमे । प्रणिशाम्यति ।

क्लम् यु ञि भिर् ग्लानौ । क्लाम्यति । क्लामति ।

अस् यु इर् क्षेपे । आस्थत् ।

यस् यु इर् प्रयत्ने । यस्यति । यसति । संयस्यति । संयसति । अन्यत्र प्रयस्यति ।

लुभ् य इर् गार्ध्ये । लोभिता । लोब्धा ।

इर् ञि मिद् या स्नेहे । मेद्यति ।

पू ङो सूतौ । असविष्ट । असोष्ट ।

ओ दी ङ् य क्षये ।

दीङष् ढ्यां यन् यब्णौ ङा सनि तु वा ॥ ६ ॥

दीङष् ढ्यां यन् यपि णौ च ङा सनि तु वा स्यात् । दीयते । अदास्त ।

दिदीये ।

जनी म य ङ् प्रादुर्भावे । जायते ।

जनबधः सेमनो ऽकमवमाचमो ञ्णित्कृदिणि स्वो ऽमयमविश्रमस्तु वा ॥ ७ ॥

जनबधः सेमो ऽमन्तस्य च कमवमाचमवर्जस्य स्वः स्यात् ञिति णिति कृति इणि च । अमयमविश्रमस्तु वा । अजनि । अजनिष्ट । जज्ञे ।

दीपी ङ् य ऋ दीप्तौ । अदीपि । अदीपिष्ट । एवं पूरी ङ् य पूर्तौ ।

पद् यौ ङ् गतौ । पदस्तनीण्य इति प्रण्यपादि । अपत्साताम् ।

बुध् यौ ङ् अवगमने । अबोधि । अबुद्ध ।

णह्यौ ज य बन्धने । नह्यो धङ् भौ । अनात्सीत् । अनद्ध ।

॥ इति दिवादिपादः ॥ ११ ॥

षु ञ् न बन्धाक्लेदपीडामन्थे । सुनोति । अभिषुणोति । सुनुतः । सुन्वन्ति । न्यषावीत् । सुस्तुधोरितीम् । असविष्ट । असोष्ट । सुषुविव । विसविष्यति । विसोष्यति । स्यान्तत्वाद् षः ।

डु मि ञ् न प्रक्षेपणे ।

मिम्योर् यब्णौ ङा खललि लियस् तु वा ॥ १ ॥

अमासीत् । प्रण्यमास्त ।

चि ञ् न चयने ।

चेः किर् वा सन्ढ्योः ॥ २ ॥

चिकाय । चिचाय । चिक्ये । चिच्ये ।

स्तृ ञ् न स्तृतौ ।

स्यादृकादृदृदृवुर अस्कुर वेन् सन्नङ्गोसेः ॥ ३ ॥

स्कृवर्जस्यादृकारान्ताद् ऋकारान्ताच्च वृञो वृङश्च सनो मे स्थितयोर ङोस्योश्च इन् वा स्यात् । अस्तरिट । अस्तृत । स्तरिषीट । स्तृषीट ।

वृ ञ् न वृतौ । अवारीत् । अवरीट । अवरिट । अवृत । ववरिथ । ववृव । वरिषीट । वृषीट ।

धू ञ् न कम्पने । अधावीत् । सुस्तुधोरितोम् ।

ल्हि न वर्धने गतौ । प्रल्हिणोति ।

ह्वेः खेर अनङि चिः ॥ ४ ॥

खेः परस्य ह्वेर चिः स्यात् । न ख् अङि । जिघाय ।

कृवि न कृतौ हिंसे ।

कृविधिव्योः कृधी श्नौ ॥ ५ ॥

कृणोति । अकृणवीत् । अत इवेदितो नुण् । चकृण्व । कृण्विता । कृण्व्यात् ।

दन्भु न दम्भे । देभतुः । ददम्भतुः ।

अन्थग्रन्थदन्भां घपि नलोपो वा ॥ ६ ॥

देभिथ । ददम्भिथ ।

धिवि न प्रीतौ । धिनोति ।

अशू ङ् न व्याप्तिसंहत्योः । स्यात्तादिति खेर आन् । आनशे ।

॥ इति स्वादिपादः ॥ १२ ॥

तुदो ञ् श व्यथने । तुदति । तुदते ।

भ्रस्जो ञ् श पाके । भृज्जति । अभ्राक्षीत् ।

भ्रस्जो ऽरे णा भर्ज वा ॥ १ ॥

बभर्ज । बभ्रज्ज । बभर्जे । बभ्रज्जे ।

मुच् लौ ञ् श प मोक्षे । नुण् रध इति नुण् । मुञ्चति । अमुचत् । अमुक्त ।
ञि लिपौ ञ् श प लेपने । अलिपत् । अलिपत । अलिप्त ।
षिचौ ञ् श प क्षरणे । निषिञ्चति । न्यषिचत् । न्यषिचत । न्यषिक्त ।
निषिषेच ।
कृती श प छिदि । नृत्कृदितीन् वा । कर्तिष्यति । कर्त्स्यति ।
षू श क्षेपे । विषुवति । व्यषावीत् ।
व्रश्चू श छेदे । वृश्चति । अव्रश्चीत् । अव्राक्षीत् । वव्रश्चतुः ।
ऋछ श गमनमोहकाठिन्येषु ।

ऋछो णुप् द्यान् ॥ २ ॥

आनर्छ ।
कॄ श विक्षेपे । ऋदिरणावितीर् । किरति । चकरतुः । करीता । करिता ।

प्रत्युपोपात् क्रः सुन् हिंसाछेदे ॥ ३ ॥

प्रत्युपाद् हिंसायान् उपाच् छेदे किरतेः सुन् स्यात् । प्रतिस्किरति । उपस्किरति ।
तृन्प श प्रीणने ।

तृन्पां नलुग् वा शणौ ॥ ४ ॥

तृन्पतुन्पतृन्फतुन्फरिन्फगुन्फदृन्फउन्भशुन्भां नकारस्य लुग् वा स्याच् शे ऽणौ च । तृपति । तृम्पति ।
चृत श हिंसे ग्रन्थे । नृत्कृदितीन् वा । चर्तिष्यति । चर्त्स्यति ।
प्रछौ श ज्ञीप्से । पृच्छति । अप्राक्षीत् । पप्रच्छ ।
सृजौ श विसर्गे । अस्राक्षीत् । ससर्जिथ । सस्रष्ठ ।
टु मस्जौ श स्नाने । मज्जति । अमाङ्क्षीत् ।
स्पृशौ श स्पृशि । अस्प्राक्षीत् । अस्पाक्षीत् । अस्पृक्षत् ।

विछ श गतौ । विच्छायति । विच्छति । अविच्छायीत् । अविच्छीत् ।
मृशौ श मृशि । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् ।
इषु श इच्छायाम् । इच्छति । वेन् सहेतीन् वा । एषिता । एष्टा ।
कुट शि कौटिल्ये ।

कुटां णुव्री ञ्णिति ॥ ५ ॥

कुटादेर् णुर् व्रिश् च स्यात् ञिति णिति । नान्यत्र । अकुटीत् ।
चुकोट ।
व्यच शि व्याजे । विचति । विव्याच । विविचतुः ।

व्यचो जिर् अञ्णिदशि ॥ ६ ॥

व्यचो जिः स्यात् । न तु जिति णिति अशि च । विचिता ।
त्रुट शि छिदि । त्रुट्यति । त्रुटति ।
स्फुर शि स्फूर्तौ । निष्फुरति । निस्फुरति । एवं स्फुल शि स्फूर्तिच-
लनयोः ।
णू शि स्तवने । अनुवीत् । नुनाव ।
मृ ङ् श मृतौ ।

मृङ्ष् टीड्ये मम् ॥ ७ ॥

ट्यां ड्याम् अन्ये च मृङो मं स्यात् । ऋद्धिः शयग्ठीपे । म्रियते । अमृत ।
मृषीष्ट । एषु किम् । ममार । मरिष्यति ।
ओ विजी ङ् श कम्पे ।

विजेर् णुर् नेमि ॥ ८ ॥

विजेर् णुर् न स्याद् इमि परे । अविजिष्ट ।

॥ इति तुदादिपादः ॥ १३ ॥

रुधिरौ ध ञि ञ् आवरणे । रुणद्धि ।

नणो न् रे ऽणौ ॥ १ ॥

नणो नकारः स्याद् अणौ रे परे । रुन्धः । रुन्धन्ति ।

अरुणद् । अरुणः । अरुणद् । अरुधत् । अरौत्सीत् ।

छृदिर् धु ञ् द्विधाकरणे । छर्दिष्यति । छर्त्स्यति । एवं तृदिर् धु ञ् नादरे । तृह् ध कि ह्निंसे ।

तृह इन् पिद्धस्रे ॥ २ ॥

तृहो नण इन् स्यात् पिति हसे रे । तृणेढि ।

तृण्ढः । तृंहन्ति । अतर्हीत् ।

ह्निसि ध कि ह्निंसे ।

नणो न लोप्यः ॥ ३ ॥

ह्निनस्ति ।

अन्जू ध ञि व्यक्तिगतिम्रक्षणे । अनक्ति ।

अन्जः सेर् इन् ॥ ४ ॥

आञ्जीत् । आनञ्ज ।

ञि इन्धी ध ङ् दीप्तौ । इन्धांचक्रे ।

॥ इति रुधादिपादः ॥ १४ ॥

तनु ञ् द विस्तारे । तनोति । तनुतः । तन्वन्ति । तन्वः । तनुवः । तन्मः । तनुमः ।

सेर् लुक् तथासोस् तन्म्यो ऽकुर् वा ॥ १ ॥

कृवर्जात् तनादेः सेर् लुक् स्याद्वा तथासोः परयोः । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः ।

षनु ञ् द दाने । सनोति । असात । असनिष्ट । असाथाः । असनिष्ठाः ।
सायात् । सन्यात् ।
क्षणु ञ् द हिंसे । अक्षणीत् ।
क्षिणु ञ् द हिंसायाम् ।

नोप्य् उतो गुण् वा तु ऋतः ॥ २ ॥

तनादेर् उतो गुण् न स्याद् उपि । ऋतस्तु वा । क्षिणोति ।
ऋणु ञ् द गतौ । ऋणोति । अर्णोति ।
डु कृ ञ् द करणे । करोति ।

कुर् उलोपौ वम्ये ॥ ३ ॥

कुर्वः । कुर्मः । कुर्यात् ।
चकृव ।

संपरेः सुम् उपात् तु भूषासंघप्रतियत्नविकृताध्याहारे ॥ ४ ॥

आभ्यां कृञः सुम् स्यात् । उपात् तु भूषादावर्थे । संस्करोति । समस्कृषाताम् । संचस्करिव । संचस्करिव । संस्क्रियात् । संस्कृषीष्ट । परिष्करोति । पर्यस्कार्षीत् । पर्यष्कार्षीत् । उपस्करोति ।

हस्तेपाणौप्राध्वंजीविकोपनिषदो व्यस्य कृञि सम् तिरोनश्चोपदेनिवचनेमनस्युरस्युपाजेऽन्वाजेसाक्षादादेस्तु वा ॥ ५ ॥

हस्तेकरोति । तिरस्करोति । करोति तिरः ।

॥ इति तनादिपादः ॥ १५ ॥

डु क्री ञ् ग द्रव्यविपर्यये । क्रीणाति । णाद्योरिति क्रीणन्ति । क्रीणीते ।
स्कु ञ् ग न उद्धृतौ ।

स्कुस्कम्भुस्कुम्भुस्तम्भुस्तुम्भुभ्यः श्नुश्नौ वे रे ॥ १ ॥

एभ्यो घे ऽर्थे श्नुः श्ना च स्याद् रे परे । स्कुनोति । स्कुनाति । विष्कभ्नोति । विष्कभ्नाति । विस्कभ्नेति षः । विस्कुभ्नोति । विस्कुभ्नाति । विष्टभ्नोति । विष्टभ्नाति । व्यष्टभत् । व्यष्टम्भीत् । वितष्टम्भ । स्तुभ्नोति । स्तुभ्नाति ।

मी ञ् ग वधे । प्रमीणाति । मिम्योरिति ङा वा । अमासीत् । अमास्त ।

पू ञ् गि शोधे ।

घ्वादेः स्वो ने व्यादेस् तु वा ॥ २ ॥

घ्वादीनां स्वः स्याद् नात्ये परे । व्यादेस् तु वा । पुनाति ।

कॄ ञ् गि हिंसे । अकरीष्ट । अकरिष्ट । अकीर्ष्ट । करिषीष्ट । कीर्षीष्ट ।

धू ञ् गि कम्पे । धुनाति । अधावीत् । अधौषीत् ।

ग्रह ञ् ग उपादाने । गृह्णाति ।

ह्रसाद् नानो ह्रौ ॥ ३ ॥

ह्रसन्तात् परो ना आनः स्याद् ह्रौ परे । गृहाण ।

अग्रहीत् । जग्राह । जगृहतुः । जग्रहिथ ।

ग्रहेर् इनो र्घो ऽढ्याम् ॥ ४ ॥

ग्रहेः परस्य इनो र्घः स्यात् । न तु ढ्याम् । ग्रहीता ।

शॄ गि हिंसे ।

शॄपॄद्रां स्वो वा किट्ढ्याम् ॥ ५ ॥

एषां स्वः स्यात् किति ढ्यां वा । शशरतुः । शश्रतुः । एवं जि पॄ गि पालने । दॄ गि भयविदारयोः ।

ज्या गि जरायाम् । जिनाति । जिज्यौ ।

व्री गि वृत्याम् । व्रिणाति । व्रीणाति ।

ज्ञा ग बोधने । जानाति ।

ग्रन्थ ग मोक्षे । ग्रथ्नाति । ग्रथ्नीतः । शग्रन्थतुः । ग्रेथिथ । शग्रन्थिथ ।
एवं ग्रन्थ कि ग दर्भे ।
कुप ग निष्कर्षे । वेनूदितौ वा । निरकोपीत् । निरकुक्षत् ।
ग्रश ग भोजने । ग्रशिता । ग्रष्टा ।
वृ ङ् ग वरणे । ग्रवरीष्ट । ग्रवरिष्ट । ग्रवृत । वव्रषे । वरिषीष्ट । वृषीष्ट ।

॥ इति क्र्यादिपादः ॥ १६ ॥

चुर कि स्तेये ।

चुर्वो जिरु वा ॥ १ ॥

चुरादेरु जिः स्याद्वा स्वार्थे । चोरयति । चोरयते । ग्रचूचुरत् । चोरयामास । चोर्यात् । पक्षे चोरतीत्यादि ।
कृत क संशब्दे ।

कीर्तिः कृतः ॥ २ ॥

कीर्तयति ।
गण त क संख्याने ।

व्हसालु लोपो ऽशित्यु ग्रयोः ॥ ३ ॥

व्हसात् परयोरु ग्रकारयकारयोरु लोपः स्याद् ग्रशिति । गणयति ।

वेटु गणकथयोरु ज्यग्रडि ॥ ४ ॥

गणकथयोः खिरु ईटु स्याद्वा जेः परे ऽङि । ग्रतीगणत् । ग्रतगणत् ।
ग्रग्लोपित्वाद्व इः ।
कथ त क वाक्यप्रबन्धे । ग्रचीकथत् । ग्रचकथत् ।

॥ इति चुरादिपादः ॥ १७ ॥

ञिः प्रेरणे ॥ १ ॥

धोरञ् ञिः स्यात्प्रेरणेऽर्थे । कुर्वन्तं प्रेरयति कारयति । अचीकरत् । अशशासत् । अडुढौकत् । अशूशवत् । अशिश्वयत् । व्यतस्तम्भत् । पर्यसीसिवत् । सात्त्वाद् न षः । अचीचकासत् । अचचकासत् । औन्दिदत् । औञ्जिजत् । आडिडत् । आर्चिचत् । अररम्भत् । अललम्भत् । अजीह्वयत् । अनङीत्युक्तेर् न ञिः । अदिध्रनत् । अध्रनयीत् । ऐलिलत् । ऐलयीत् । आर्दिदत् । आर्दयीत् । औनिनत् । औनयीत् ।

स्मृदृत्वरप्रथम्रदस्तृस्पशोऽङ् ञेर् ज्यङि चेटवेटोस् तु वा ॥ २ ॥

एषां ञेर् अङ् स्यात् ज्यङि । चेटवेटोस् तु वा । असस्मरत् । अददरत् । अतत्वरत् । अपप्रथत् । अमम्रदत् । अतस्तरत् । अपस्पशत् । अचचेटत् । अचिचेटत् । अववेटत् । अविवेटत् ।

भ्राजभाशभासभासभापदीपजीवमीलपीडकणरणवणभणश्रणह्वेलपलुपलुठह्वेठां वोङः ह्रस्वः ॥ ३ ॥

एषामुङः ह्रस्वः स्याद्वा ज्यङि । अबिभ्रजत् । अबभ्राजत् ।

ऋङो णुः ॥ ४ ॥

ऋङो धोर् णुरिव स्याद्वा ज्यङि । अवीवृतत् । अववर्तत् ।

स्वपो त्रिः ॥ ५ ॥

स्वपो त्रिः स्यात् ज्यङि । असूषुपत् ।

शाह्वासाह्वाव्येवेपां ञौ यन् ॥ ६ ॥

एषां ञौ परे यन् स्यात् । शाययति । ह्वाययति । साययति । पाययति ।

द्वेः पिबः पीप्यो ज्यङि ॥ ७ ॥

अपीप्यत् ।

क्रीङ्जीरीक्नूय्यूक्ष्माय्यातां पन् गुणः न ञौ ॥ ८ ॥

ह्रेपयति । ब्लेपयति । रेपयति । क्नोपयति । अर्पयति । क्ष्मापयति । स्थापयति ।

स्थोङो ञ्य्अङोः ॥ ९ ॥

तिष्ठतेर् उङ इः स्यान् ञ्य्अङि । अतिष्ठिपत् ।

घ्रो वा ॥ १० ॥

अजिघ्रिपत् । अजिघ्रपत् ।

पातिस्फायोर् लन्वङौ जौ ॥ ११ ॥

पालयति । स्फावयति ।

प्रीधूञोर् नन् वा ॥ १२ ॥

प्रीणयति । प्राययति । धूनयति । धावयति ।

रुहः पङ् वा ॥ १३ ॥

रोपयति । रोह्यति ।

शदो ऽगतौ तङ् ॥ १४ ॥

शातयति । गतौ तु गाः शादयति गोपः ।

लात्योर् लन्ननौ स्नेहद्रवे वा ॥ १५ ॥

लातेर् लन् लियो नन् स्यात्स्नेहद्रवे ऽर्थे जौ वा । विलालयति । विलापयति । विलीनयति । विलाययति । मिम्योरिति ङा वा । विलापयति घृतम् । स्नेहद्रवे किम् । लौहं विलापयति ।

वो जन् धूतौ ॥ १६ ॥

वातेर् जन् स्यात्कम्पने जौ । वाजयति । धूतौ किम् । केशान्वापयति ।

क्रीजीङो ऽज् आ चिस्फुरप्रजनार्थवीनां तु वा ॥ १७ ॥

एषामच आ स्याज् जौ । च्यादेस्तु वा । क्रापयति । जापयति । अध्यापयति । अध्यापिपत् । अध्यजीगपत् । चापयति । चाययति । चपयति ।

चययति । मित्त्वाद् ह्रस्व इति प्रक्रियारत्ने दृष्टम् । स्फारयति । स्फो-
रयति । वापयति । वाययति । गाः पुरोवातो गर्भं ग्राह्यतीत्यर्थः ।

स्मिभ्योर् घाद् ध्वर्थे मं च ॥ १८ ॥

अनयोर् अच आ स्याद् घाद् ध्वर्थे निष्पन्ने ञौ मं च । विस्मापयते भा-
पयते मुण्डः । घात् किम् । कुञ्चिकयैनं विस्माययति भाययति ।

भीर् भीष् वा ॥ १९ ॥

भियो घभये भीष् वा स्याज् ञौ मं च । भीषयते मुण्डः ।

डुपेर् ओद् ऊः ॥ २० ॥

डुपेर् ओकारस्य ऊः स्याज् ञौ । डूपयति ।

चिद्विकारे वा ॥ २१ ॥

डूपयति दोषयति चित्तम् ।

घटादिजनीजॄष्क्नसरजाम्नारतोपनिशाननिशामार्थज्ञां स्वो ऽकमानचनो ञा-
ण्णमोस्तु र्घश् च जागुश् च ॥ २२ ॥

घटाद्यादेर् अमन्तस्य माराद्यर्थज्ञश् च ञौ स्वः स्यात् । न तु कमानच-
माम् । ञेः परयोर् इण्णमोस् तु र्घश् च । जागुश् च स्वो र्घश् च ।
घटयति । व्यथयति । जनयति । जरयति । क्नसयति । रजयति । मृ-
गाव्रमयति । गमयति । ज्ञपयति । कमादेस्तु । कामयति । आमयति ।
चामयति ।

ज्वलह्वलह्मलग्लास्नावनरमनमो ऽगेर् वा ॥ २३ ॥

एषाम् अगीनां स्वः स्याद्वा ञौ । ज्वलयति । ज्वालयति । ह्वलयति ।
ह्वालयति । ह्मलयति । ह्मालयति । ग्लपयति । ग्लापयति । अगेः
किम् । प्रज्वालयति । प्रग्लापयति ।

वा शमयमफणगिस्खदाम् ॥ २४ ॥

एषां स्वः स्याद्वा ञौ । शमयति । शामयति । यमयति । यामयति । फणयति । फाणयति । परिस्खदयति । परिस्खादयति ।

हनस् तङ् अणव्इणि ञ्णिति ॥ २५ ॥

ञिति णिति च परे हन्तेस् तङ् स्यात् । न तु णपि इणि च । घातयति ।

यिः सन् वेर्ष्यो द्विः ॥ २६ ॥

ईर्ष्यतेर् ण्यन्तस्य यिर् एव द्विः स्यात् । सन्नन्तस्य तु वा । ऐर्ष्यियत् ।

॥ इति ण्यन्तपादः ॥ १८ ॥

सन् इच्छायाम् ॥ १ ॥

धोः सन् स्यादिच्छार्थे । अत्तुमिच्छति जिघत्सति । दिदासते । दिदीषते । दिद्योतिषते । उतिच्छिषति । उचिच्छिषति । अधिजिगापयिषति । अध्यापिपयिषति । शुशावयिषति । शिश्वाययिषति । जुहावयिषति ।

णुर् नानिमि ॥ २ ॥

अनिमि सनि णुर् न स्यात् । विवृत्सति । विवर्तिषते । निनृत्सति । निनर्तिषति । तितरीषति । तितरिषति । तितीर्षति ।

र्घो ऽज्हन्इङ्गमाम् ॥ ३ ॥

अजन्तस्य हन्तेर् इङः स्थाने जातस्य गमश् च र्घः स्यात् सनि । दिध्वरिषति । दुध्वूर्षति । विवरीषति । विवरिषति । वुवूर्षति । संचिष्कीर्षति । चिकीर्षति । जिगीषति । चिकीषति । चिचीषति । जिघांसति ।

गम् इण्ङोः ॥ ४ ॥

इण्ङोः स्थाने गमः स्यात् सनि । जिगमिषति । अधिजिगांसते ।

नेम् उगुह्यग्रहः ॥ ५ ॥

उवर्णान्ताद् गुहो ऽक्षश्च सन इन् न स्यात् । बुभूषति । जुघुक्षति ।
जुघुक्षति ।

ग्रहस्वपप्रच्छां त्रिः ॥ ६ ॥

एषां त्रिः स्यात् सनि । जिघृक्षति । सुषुप्सति ।

स्मिङ्पूङृअञ्जश्शूकॄगॄदृङ्धृङ्प्रच्छ इन् ॥ ७ ॥

एभ्यः परस्य सन इन् स्यात् । सिस्मयिषते । पिपविषते । अरिरिषति ।
अञ्जिजिषति । अशिशिषते । चिकरिषति । पिपृच्छिषति ।

भ्रस्जश्रिस्वृयूर्णुभरदरिद्रासनतनपतज्ञपर्धिदन्भूङ्वो वा ॥ ८ ॥

एभ्यः सन इन् वा स्यात् । बिभर्जिषति । बिभ्रज्जिषति । बिभ्रक्षति ।
शिश्रयिषति । शिश्रीषति । सिस्वरिषति । सुस्वूर्षति । यियविषति ।
युयूषति । ऊर्णुनुविषति ऊर्णुनविषति । ऊर्णुनूषति । बिभरिषति ।
बुभूर्षति । दिदरिद्रिषति । दिदरिद्रासति । सिसनिषति । सिषासति ।
तितनिषति । तितंसति । तितांसतीत्येके । पिपतिषति ।

मिमीमादारभलभशकपतपद्हिंसार्थराधो ऽचो ऽनिम्सनोस् त्रिलोपश्च ॥ ९ ॥

एषाम् अच इस् स्यात् त्रिलोपश्चानिमि सनि । स्यादेः सो लोपः । पित्सति ।

जिज्ञपयिषति ।

ज्ञपर्ध्यापान् ईर्यः ॥ १० ॥

एषाम् अच ई ईर् ई एते क्रमात्स्युः त्रिलोपश्चानिमि सनि । ज्ञीप्सति ।
अर्दिधिषति । ईर्त्सति । ईप्सति ।

दिदम्भिषति ।

दम्भो धौ ॥ ११ ॥

दम्भेर् अच इ ई च स्यात् त्रिलोपश्च अनिमि सनि । धिप्सति । धीप्सति ।

अनकारनिर्देशाद् दिदेविषति ।

छ्वोः शूटाव् अणौ जस्क्वौ यङ्लुग्वोस् तु वा ॥ १२ ॥

छकारवकारयोः शकारोटौ स्यातान् अणौ जसे क्वौ च । यङ्लुकि वे च वा स्तः । दुद्यूषति ।

मित्सति । दित्सति । धित्सति । रिप्सते । लिप्सते । शिक्षते । षित्सते । प्रतिरित्सति । हिंसार्थः किम् । आरिरात्सति । ईप्सति ।

मुचो ऽढे द्वेर् मोच वा सनि ॥ १३ ॥

अढस्य मुचो द्वेः स्थाने मोच वा स्यात् सनि । मोक्षते । मुमुक्षते ।

जयलपोः ख्योर् य् ए ॥ १४ ॥

खेर् उवर्णस्य जकारयलपवर्गात् परे ऽवर्णे परे इः स्यात् सनि । जु गतौ । जिजावयिषति । रिरावयिषति । पिपावयिषति । बिभावयिषति । जयलपोः किम् । नुनावयिषति । अत एव जौ द्वित्वे ब्रिः ।

श्रुम्रुक्षुद्रुप्रुप्लुच्युङां वा ॥ १५ ॥

शिश्रावयिषति । शुश्रावयिषति ।

व्य्उङो ऽय्वो ह्रसादेः सेनः क्त्वाच् च किद् वा रुदविदमुषस् तु नित्यम् ॥ १६ ॥

ह्रसादेः सेन उकारोङ इकारोङश् च यान्तवान्तवर्जात् सन् क्त्वाच् च किद् वा स्यात् । रुदादेस् तु नित्यम् । रुरुचिषते । रुरोचिषते । लिलिखिषति । लिलेखिषति । रुदविदमुषस्तु रुरुदिषति । विविदिषति । मुमुषिषति ।

जिस्त्वोः खेः सः षः षण्य् अस्वित्स्वत्सहः ॥ १७ ॥

खेः परस्य ञ्यन्तस्तौत्योः सस्य षत्वभूते सनि षः स्यात् । न तु स्विदस्वदसहाम् । सुष्वापयिषति । तुष्टूषति । जिस्त्वोः किम् । सिसिक्षति । षणीति किम् । तिष्ठासति । खेः किम् । प्रतीषिषति ।

॥ इति सन्नन्तपादः ॥ १९ ॥

मूत्रसूत्रसूचाट्अश्अर्त्यूऊर्णुहसाद्येकाचो ऽशुभरुचो मुहुर्भृशार्थे यङ् ॥ १ ॥

एभ्यः शुभरुचवर्जेभ्यो यङ् स्यात्पौनःपुन्ये ऽतिशये चार्थे ।

गत्यर्थाद् गॄलुपसदचरजपजभदन्शदहो वक्रगर्हे ॥ २ ॥

गत्यर्थाद् वक्रे ग्रादेर् गर्हायां यङ् स्यात् । न तु पूर्वोक्ते । तद्युक्ते तु स्यात् ।

खेर् णुः ॥ ३ ॥

यङि परे खेर् णुः स्यात् । पुनः पुनरतिशयेन वा मूत्रयति मोमूत्र्यते । सोसूत्र्यते । सोसूच्यते ।

र्घो ऽनितः ॥ ४ ॥

अनकारेतः खे र्घः स्याद् यङि । अटाट्यते । अशाश्यते । अरार्यते । ऊर्णोणूयते । देदीयते । मेमीयते । जेगीयते । जेह्रीयते । पेपीयते । सेपीयते । तेष्ठीयते । शोशूयते । शेश्वीयते । सास्मर्यते । चेक्रीयते । यङ्ड्यक्ये चर्द्री । संचेष्क्रीयते । विसेसिच्यते । यङुक्तत्वाद्ग षः । वक्रं व्रजति वाव्रज्यते ।

ग्रो र लः ॥ ५ ॥

गिरते रो लः स्याद् यङि । गर्हितं गिरति जेगिल्यते । लोलुप्यते । सासद्यते ।

कोश् चुर् वा ॥ ६ ॥

कोः खेश् चुः स्याद्वा यङि । चोकूयते । कोकूयते ।

नीन् वन्चस्रन्सध्वन्सभ्रन्शकसपतपदस्कन्दाम् ॥ ७ ॥

एषां खेर् नीन् स्याद् यङि । वनीवच्यते ।

जमजपजभदहदन्शभञ्जपशशपो ऽतो नुण् लवयस् तु वा ॥ ८ ॥

जमन्तानां जपादीनां च अदन्तस्य खेर् नुण् स्याद् यङि । लवयान्तस्य तु वा । जञ्जन्यते । जाजायते । जङ्घन्यते ।

ह्न वा घ्री ॥ ९ ॥

जेघ्रीयते ।

जञ्जप्यते । चञ्चल्यते । चाचल्यते । मम्मव्यते । मानव्यते । दन्दप्यते ।

दादप्यते ।

चरफलोर् उच् चोङो न णुः ॥ १० ॥

चरफलोः खेर् नुण् स्याद् यङि । उङ् उकारश्च । तस्य च न णुः ।

चञ्चूर्यते । पम्फुल्यते ।

रीन् ऋत्वतः ॥ ११ ॥

ऋकारवतो धोः खे रीन् स्याद् यङि । नरीनृत्यते ।

व्येस्वपस्यमो जिः ॥ १२ ॥

एषां जिः स्याद् यङि । वेवीयते । सोषुप्यते । सेसिम्यते ।

न वशः ॥ १३ ॥

वष्टेर् जिर् न स्याद् यङि । वावश्यते ।

चायः कीः ॥ १४ ॥

चायतेः कीः स्याद् यङि । चेकीयते ।

घ्राध्मोर् ङीः ॥ १५ ॥

जेघ्रीयते । देध्मीयते ।

शीङो ङय् ये ऽणौ ॥ १६ ॥

शाशय्यते ।

यङो लुग् वापो लुक् पं द्विर् ण्वादि च धूक्तं तु वानि तु नित्यं नोतः ॥ १७ ॥

यङो लुग् वा स्यात् । लुकि सति अपो लुक् पं द्वित्वं खेर् णुरित्यादि कार्यं च स्यात् । धुग्रहणोक्तं तु वा स्यात् । अनि तु नित्यं लुक् स्यात् । उदन्तात् त्व् अनि न स्यात् । बोभवीति । बोभोति । बोभूतः । बोभुवति । अबोभवीत् । अबोभोत् । अबोभूताम् । अबोभुवन् । बोभु-

वांचकार । वनीवञ्चीति । वनीवङ्क्ति । वनीवक्तः । जङ्गमीति । जङ्गन्ति । जङ्गतः । जङ्गमीति । जङ्गमीति । जङ्गमीमि । जङ्गन्मि । जङ्गन्वः । जङ्गन्मः । जङ्घनीति । जङ्घन्ति । जङ्घतः । जङ्घ्नति । जङ्घनाति । चञ्चुरीति । चञ्चूर्ति । चाखातः । चङ्खतः । चङ्खाति । चङ्खनाति । जाजातः । जञ्जन्तः । जञ्जति । जञ्जनाति । देदिवीति । देद्योति । देदेति । देद्युतः । देदितः । देद्युवः । देदिवः । वेविच्छीति । वेवेष्टि । वेविश्वः । वेविच्छुः ।

ह्वाकः खेर् न धेः ॥ १८ ॥

जह्वाति । जह्वेति ।

दन्शो नलोपो वा ॥ १९ ॥

दन्दशीति । दन्दंशीति । दन्दष्टि । दन्दंष्टि ।

निर् न वा ॥ २० ॥

सास्त्रपीति । सास्वप्ति । सोषुपीति । सोपोति ।

ऋणो रिनूरुणौ वा ॥ २१ ॥

ऋणः स्थाने रिनूरुणौ वा स्तो यङ्लुकि । चरिकरीति । चर्करीति । चरीकरीति । चरिकर्ति । चर्कर्ति । चरीकर्ति ।

यङ्लुक्यलोपे ऽरे न गुत्री ॥ २२ ॥

वेभिदिता । मर्मृजिता । अरे क्विप् । वेभेत्ति । मर्मार्ष्टि ।

॥ इति यङ्लुपादः ॥ २० ॥

लेः काम्यक् स्वेच्छायाम् ॥ १ ॥

लेः परः काम्यक् स्यादात्मेच्छायाम् । आत्मनः पुत्रमिच्छति पुत्रकाम्यति ।

क्यो ऽमूव्याद् यू अन् च ॥ २ ॥

मालव्यवर्णाल् लेः क्यः स्यात्स्वेच्छायाम् । तस्मिन् अवर्णे ईः स्यात् ।

ज्ञानीयति । ओदौतो ऽज्वदिति गव्यति । नाव्यति । यङ्ङ्यङ् इति कर्त्रीयति । क्यङ्यच्वौ च । गार्गीयति ।

नलोपः क्यङ्ये ॥ ३ ॥

राजीयति ।

ह्रसात् तयोर् वारे ॥ ४ ॥

ह्रसात् परयोः क्यङ्ययोर् लोपः स्याद्वारे । सन्निधिता । सन्निध्यता । अन्व्यात् किम् । किंकाम्यति । स्वःकाम्यति ।

धनोदकाशनवृषाश्वलेर् ग्रहपानान्ने यागे ऽर्थे ङा डनङ् ङा सन् सन् असनौ क्ये न षः ॥ ५ ॥

धनस्य ग्रहणे ङा । उदकस्य पाने डनङ् । अशनस्य अन्ने ङा । वृषाश्वयोर् यागे सन् । लेर् अर्थे काम्ये सन् असन् च स्यात् क्ये । सः षो न स्यात् । धनायति । उदन्यति । अशनायति । वृषस्यति । अश्वस्यति । दधिस्यति । दध्यस्यति । ग्रहादौ किम् । धनीयति ।

ठडोपमानादाचारे क्यः ॥ ६ ॥

ठाड् डाच् चोपमानात् क्यः स्यादाचारे ऽर्थे । शिवमिवाचरति शिवीयति विष्णुम् । विष्णाविवाचरति विष्णूयति शिवे ।

घाद् ड्यक्यौ सलोपश्च वा गल्भक्लीबहोठात् तु मन् ॥ ७ ॥

घाद् उपमानादाचारे ऽर्थे ड्यक्यौ स्तः । सस्य च वा लोपः । गल्भादेस्तु घ्यावपि मन् । कृष्ण इवाचरति कृष्णायते । कृष्णति । स्वायते । स्वति । स्वामान । त्यान्तत्वाद् आन् । पयायते । पयस्यते । गल्भायते । गल्भते ।

भृशादेश् च्व्यर्थे वा तसलोपश्च ॥ ८ ॥

भृशादिभ्यश् च्व्यर्थे ड्यक्यौ वा स्तः । तस्मिंस् तसलोपश्च । भृशायते । भृशति । भृशीभवति । चेतायते । चेतति । शश्वायते । शश्वति । वेहायते । वेहति ।

डाज्लोहितादेः पं च ॥ ९ ॥

डाजन्ताल् लोहितादेश्च च्व्यर्थे ड्यक्वी वा स्तः । पं च । अपटत् पटद्भवति पटपटायते । पटपटायति । पटपटाति । पटपटास्यात् । लोहितायते । लोहितायति । लोहितति । लोहितीस्यात् । धर्मायते । धर्मायति । धर्मति । धर्मीस्यात् ।

शब्दसुखकष्टादेः कृतिवेदपापे ड्यः ॥ १० ॥

शब्दादेः कृतौ । सुखादेर् अनुभवे । कष्टादेः पापार्थे प्रवृत्तिरित्यस्मिन्नर्थे ड्यः स्यात् । शब्दं करोति शब्दायते । वैरायते । सुखमनुभवति सुखायते । दुःखायते । कष्टं कर्म करोति कष्टायते ।

वाष्पोष्मफेनधूमादुद्वान्तौ ॥ ११ ॥

वाष्पायते । उष्मायते । फेनायते । धूमायते ।

रोमन्थाच्चर्वणे ॥ १२ ॥

रोमन्थायते गौः ।

नमस्तपोवरिवःकण्ड्वादिभ्यः क्यः कृतौ ॥ १३ ॥

नमस्करोति नमस्यति । तपस्यति । वरिवस्यति । कण्डूयति । कण्डूयते । मह्रीयते । चित्रीयते ।

लेः कृत्याख्याने जिः ॥ १४ ॥

लेः परो जिः स्यात्कृतावाख्याने च । प्रश्नं करोति आचष्टे वा प्रश्नयति । ऊढयति । औडिढत् । औजढदित्येके । लुग्नद्वद्विनामिति ईण्नन्तमाचष्ट ईशयति । स्रुग्वन्तमाचष्टे स्रुचयति । स्रग्विणमाचष्टे स्रजयति ।

श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलोपः ॥ १५ ॥

श्वेताश्वमाचष्टे श्वेतयति । अश्वयति । गालोडयति । आह्वरयति ।

नाप् सत्यार्थवेदैकाज्अतः ॥ १६ ॥

सत्यादेर् एकाचो ऽकारान्तस्य च जौ नाप् स्यात् । न इत् । सत्याप-

यति । अर्थापयति । वेट्टापयति । स्वापयति । वाढाल्लिकेति साधादयः । साध्यति । नेद्यति इत्यादि । प्रशस्त्यमाचष्टे आपयति ।

जिः कल्यादेः ॥ १७ ॥

कल्यादेरर्थविशेषे जिः स्यात् । कलिं गृह्णाति कलयति । अचकलत् । कलयति । अत्रकलत् । कृतयति । अचीकृतत् । अचकृतत् । वर्णयति । व्रचयति । तूस्तानि विकल्पति वितूस्तयति । वस्त्रं संह्रादयति संवस्त्रयति । वर्मणा संनह्यति संवर्मयति । चूर्णैरवधंसते ऽवचूर्णयति । हस्तिनातिक्रामति अतिहस्तयति । वीणया उपगायति उपवीणयति । तूलैरवकुञ्जाति अवतूलयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनयाभिमुखं याति अभिषेणयति । अभिषिषेणयिषति । रूपं पश्यति रूपयति । लोमान्यनुमार्ष्टि अनुलोमयति । हस्तौ निरस्यति अतिहस्तयति । पुच्छमुत्क्षिपति उत्पुच्छयते गौः । भाण्डानि संचिनोति संभाण्डयते । चीवरं संनह्यति परिदधाति वा संचीवरयते भिक्षुः ।

लिचोर्यथेष्टं द्विः कण्ड्वाद्यन्त्ययोस्तु तृतीयानाद्योः ॥ १८ ॥

पुपुत्त्रीयिषति । पुतित्त्रीयिषति । पुत्त्रीयिषिषति । पुत्त्रीयिषिषति । पुपुतित्त्रीयिषिषिषति । अशिश्वीयिषति । अश्वीयिषिषति । अशिश्वीयिषिषिषति । कण्टूयिषिषति ।

॥ इति लिन्युपादेः ॥ २५ ॥

वे पे परानुकृप्रत्यभ्यतिन्नितप्रवल्हपरिमृषव्यापरिरमो वा तूपरमो ऽछे ॥ १ ॥

एभ्यः पे स्याद् वे । उपरमतु वा । न तु छे । पराकरोति । अनुकरोति । प्रतिनिनयति । अभिनिनयति । अतिनिनयति । प्रवल्हति । परिमृष्यति । विरमति । आरमति । परिरमति । उपरमति उपरमते भिक्षुः ।

कम्पान्नार्थेङ्बुधयुधप्रुद्रुस्रुजननशो ऽञिप्राणिघाढाच् च ञेः ॥ २ ॥

चलयति । भोजयति । अध्यापयति । बोधयति । योधयति । प्रावयति । द्रावयति । स्रावयति । जनयति । नाशयति । शाययति कृष्णं यशोदा । प्राणिघात् किम् । शोषयते शालिमर्कः । अढात् किम् । भक्तिं कारयते । अञौ किम् । रूपयते हरिः ।

॥ इति पपादः ॥ २२ ॥

विपराजिपरिव्यवक्रीनिविशानुप्रछो मम् ॥ १ ॥

एभ्यो मं स्याद् घे । विजयते । पराजयते । परिक्रीणीते । निविशते । आनुते । आपृच्छते ।

आदाञो ऽस्वप्रसारे ॥ २ ॥

आदत्ते । स्वप्रसारे तु व्याददाति मुखं कृष्णः ।

आगमेः क्षान्तौ ॥ ३ ॥

आगमयते कालम् ।

पर्यन्ववाङः क्रीडः ॥ ४ ॥

परिक्रीडते । अनुक्रीडते । अवक्रीडते । आक्रीडते ।

समो ऽकूजने ॥ ५ ॥

संक्रीडते । कूजने तु संक्रीडति चक्रम् ।

क्रो ऽपाद् हर्षान्नवासेच्छे चतुष्पाद्वौ सुम् च ॥ ६ ॥

अपस्किरते मत्तः कुक्कुटः श्वा वा । अन्यत्र मल्लो ऽपकिरति मल्लम् । गजो ऽपकिरत्यम्भः ।

शपथाशीर्गत्यनुकारे शपनाथहञः ॥ ७ ॥

कृष्णाय शपते गोपी मोक्षाय नाथते मुनिः ।

पैतृकमनुहरते ऽश्वः ।

प्रतिज्ञानिर्णयप्रकाशे संप्रव्यवाच्च स्थः ॥ ८ ॥

नित्यं शब्दमातिष्ठते । त्वयि तिष्ठते विवादः । रामाय तिष्ठते सीता ।
संतिष्ठते । प्रतिष्ठते । वितिष्ठते । अवतिष्ठते । समस्थित ।

उदो ऽनूर्ध्वेह्ने ॥ ९ ॥

मुक्तावुत्तिष्ठते । अन्यत्र आसनादुत्तिष्ठति । ग्रामाच्छतमुत्तिष्ठति ।

मन्त्रेणोपात् ॥ १० ॥

उपात् स्थो मं स्यादान्त्रकरणे ऽर्थे । गायत्र्योपतिष्ठते ऽर्कं विप्रः ।

मैत्राध्वसंगाराधे ॥ ११ ॥

सन्तमुपतिष्ठते साधुः । गङ्गामुपतिष्ठते पन्थाः । पतिमुपतिष्ठते नारी ।
विष्णुमुपतिष्ठते भक्तः ।

लिप्सायां वा ॥ १२ ॥

भिक्षुर्धार्मिकमुपतिष्ठति उपतिष्ठते वा ।

अढात् ॥ १३ ॥

ज्ञाननुपतिष्ठते ।

समो गम्ऋच्छप्रच्छस्वृश्रुवेत्त्यूर्तिदृशः ॥ १४ ॥

संगच्छते । समगत । समगंस्त । संगमाष्ट । संगंसीष्ट । समृच्छते । संपृच्छते । संस्वरते । संशृणुते । संवित्ते । संविद्रते । संविदते । समियृते ।
संपश्यते । अढात् किम् । गङ्गां संगच्छति ।

गेरु वास्योह्नो ढे च ॥ १५ ॥

निरस्यते । निरस्यति हस्तौ । समूहते । समूहति ।

गेरु ऊहः स्वो ये ऽणौ ॥ १६ ॥

ब्रह्म समुह्यात् ।

आत्माङ्गढाद् अढाच् चाहनयमः ॥ १७ ॥

आत्माङ्गढाद् आङो हनयमो मं स्यात् । अढाच् च । आहत । आवधिष्ट । आहसाताम् । आवधिषाताम् ।

यमः सूचने वा तूद्वाहे ॥ १९ ॥

आयत । उपायत । उपायंस्त ।

आत्माङ्गढादढाच्च किम् । शत्रुमाहन्ति । परशिर आयच्छति ।

व्युत्तपः ॥ २० ॥

वितपत उत्तपते पाणिम् । वितपते । उत्तपते । आत्माङ्गढादढाच्च किम् । महीं वितपत्यर्कः ।

तपो ढाद् यक् च रे ॥ २१ ॥

तप्यते तपस्तापसः । रे किम् । अतप्त ।

सृजः श्राद्ध्यात् तनीण् च ॥ २२ ॥

सृज्यते स्रजं भक्तः । असर्जि । श्राद्ध्यात् किम् । सृजति स्रजं मालिकः ।

निसंव्युपह्वः ॥ २३ ॥

निह्वयते । संह्वयते । विह्वयते । उपह्वयते ।

स्पर्धायाम् आङः ॥ २४ ॥

कृष्णश्चानूरमाह्वयते ।

सूचनावक्षेपणसेवासाहसप्रतियत्नक्थोपयोगे कृञः ॥ २५ ॥

अपकुरुते जनः । श्येनो वर्त्तिकामुपकुरुते । विष्णुं प्रकुरुते । परदारान्प्रकुरुते । एधोदकस्योपस्कुरुते । गीताः प्रकुरुते । शतं प्रकुरुते ।

अधेः शक्तौ ॥ २६ ॥

दैत्यानधिकुरुते कृष्णः ।

शब्दढाढाद् वेः ॥ २७ ॥

स्वरान्विकुरुते वायुः । विकुरुते । शब्दढादढाच्च किम् । चित्तं विकरोति कामः ।

ज्ञानार्चीत्तेपोपनयनभृतिविज्ञानव्ययेषु नीञः ॥ २८ ॥

शास्त्रे नयते । विद्युं नयते । दण्डमुद्यमते । पुत्रमुपनयते । भृत्यमुपनयते । ऋणं विनयते । द्रव्यं विनयते ।

धर्म्यानूर्ध्वात् ॥ २९ ॥

क्रोधं विनयते । धर्म्यं किम् । गुरोः क्रोधं विनयति । अनूर्ध्वं किम् । गण्डं विनयति ।

वृत्त्युत्साहनायने क्रमः परोपक्रमः ॥ ३० ॥

शस्त्रु क्रमते बुद्धिः । धर्माय क्रमते साधुः । सतां श्रीः क्रमते । एवं पराक्रमते । उपक्रमते ।

आङो भोज्ञे ॥ ३१ ॥

भानां सूर्यचन्द्रादीनामुदय ऊर्ध्वगमन आङ्पूर्वात् क्रमो मं स्यात् । आक्रमते ऽर्कः । भोज्ञे किम् । आक्रामति धूनः । त्वं व्याप्नोतीत्यर्थः ।

वेः पद्भिः ॥ ३२ ॥

साधु विक्रमते वाग्मी । पद्भिः किम् । वाग्मिना विक्रामति ।

प्रोपाद् आरम्भे ॥ ३३ ॥

भोक्तुं प्रक्रमते । उपक्रमते ।

वागेः ॥ ३४ ॥

क्रमते । क्रामति ।

निजिवे ज्ञः ॥ ३५ ॥

शास्त्रमपजानाति ।

अकात् ॥ ३६ ॥

सर्पिषो जानीते ।

संप्रतेरस्मृतौ ॥ ३७ ॥

संजानीते । प्रतिजानीते । अस्मृतौ किम् । पुत्रं संजानाति ।

जेर् ङे ऽजौ घे ॥ ३८ ॥

अज्यते यङ् ङं ज्यत्ते यदि घो भवति । तस्मात् ज्यत्वाद् धातोर् घे मं स्याद्स्मृतौ । दर्शयते भवो भक्तान् । अजौ यङ् ङं तच्चेद् घ इति किम् । दर्शयति शंभुं भक्तान्भक्तिः । स्मृतौ तु स्मारयति भक्तान्हरिः ।

ज्ञानयत्नप्रलोभे वदः ॥ ३९ ॥

पाणिनिर्वदते । नेत्रे वदते । शिष्यमुपवदते ।

अनोर् अठात् ॥ ४० ॥

अनुवदते ।

विवादिव्यक्तसल्लोक्तयोः ॥ ४१ ॥

विवदते शिष्याः । व्यक्तं किम् । संप्रवदन्ति खगाः ।

तद्योगे वा ॥ ४२ ॥

विप्रवदते विप्रवदन्ति वैद्याः ।

अवाद् गिरः ॥ ४३ ॥

अवागिरते ।

समः प्रतिज्ञायाम् ॥ ४४ ॥

शतं संगिरते ।

उच्चरः सठात् ॥ ४५ ॥

धर्ममुच्चरते । सठात् किम् । धूम उच्चरति ।

समस् त्र्या ॥ ४६ ॥

अध्वेन संचरते ।

दानः सा चेच् च्यर्थे ॥ ४७ ॥

दास्या संयच्छते कामी । च्यर्थे किम् । दास्या संयच्छति भिक्षां भिक्षवे ।

उपयमो विवाहे ॥ ४८ ॥

रामः सीतामुपायत । उपायंस्त ।

भुजो ऽशने ॥ ४९ ॥

शालीन्भुङ्क्ते । अनशने तु पृथ्वीं भुनक्ति राजा ।

संक्ष्णोः ॥ ५० ॥

शस्त्रं संक्ष्णुते ।

युजिर् उद्ग्युप्र्वो ऽयज्ञपात्रे ॥ ५१ ॥

उद्युङ्क्ते । प्रयुङ्क्ते । उपयुङ्क्ते । यज्ञपात्रे तु प्रयुनक्ति स्रुवम् ।

प्रतारे वञ्चिगर्धेः ॥ ५२ ॥

वटुं वञ्चयते । गर्धयते । प्रतारे किम् । श्येनो ऽहिं वञ्चयति ।

पूजाभिभवे च लापेः ॥ ५३ ॥

जटाभिर्लापयते । श्येनो वर्त्तिकामुल्लापयते । पुत्रमुल्लापयते । एषु किम् ।
घृतं विलापयति ।

मिथ्याकारेर् अभ्यासे ॥ ५४ ॥

पदं मिथ्या कारयते । मिथ्या किम् । साधु पदं कारयति । अभ्यासे
किम् । सकृत्पदं मिथ्या कारयति ।

व्यतीहारे गतिहिंसाशब्दार्थहसाम्यहृवहो ऽनन्यो ऽन्यार्थे ॥ ५५ ॥

व्यतिभवते ऽर्कमिन्दुः । व्यतिहरते । व्यतिवहते । व्यतिजज्ञिरे । व्य-
तिजज्ञिषन् ।

ह्रो ऽस्तेर् एति ॥ ५६ ॥

अस्तेर् हः स्याद् एकारे परे । व्यतिहे ।
गत्यर्थादेस्तु व्यतिसर्पन्ति । व्यतिघ्नन्ति । व्यतिजल्पन्ति । व्यतिहस-
न्ति । अन्यो ऽन्यार्थे तु परस्परं व्यतिलुनन्ति ।

स्मृदृश्यनुज्ञानाप्रतिश्रोः सनः ॥ ५७ ॥

सुस्मूर्षते । दिदृक्षते । जिज्ञासते । शुश्रूषते । अन्यत्र अनुजिज्ञासति ।
आशुश्रूषति । प्रतिशुश्रूषति ।

जिज्ञ्यन्तपिबधेनृद्वदवसदम्रुचादपरिमुह्यायमयसो ऽगिज्ञापवदो ऽग्रन्थो-त्सम्आयमः फलिनि ॥ ५८ ॥

जितो ञ्यन्तपिबादेर् अगिज्ञानातेर् अपवदो ऽग्रन्थोदादिपूर्वयमश्च फलवति घे मं स्यात् । यजते । पाययते । धापयते । नर्तयते । वादयते । वासयते । दमयते । रोचयते । आदयते । परिमोह्यते । आयामयते । आयासयते । जानीते । अपवदते । उद्यच्छते । संयच्छते । आयच्छते । ग्रन्थे तु वेदमुद्यच्छति । फलिनि किम् । यजति याजकः ।

॥ इति मपादः ॥ २३ ॥

ढभावे मन् ॥ १ ॥

धोर् ढे भावे च मं स्यात् ।

रतनोर् यग्इणौ ॥ २ ॥

धो रे परे यक् तनि पर इण् स्याड् ढे भावे च । स्तूयते विष्णुः । स्तूयेत । स्तूयताम् । अस्तूयत । अस्तावि ।

ह्नग्रहदृप्र्अचः सिद्यादेर् निण् वा ॥ ३ ॥

एभ्यः परासां सिडीढीतीथीनां निण् वा स्याड् ढभावे । अस्ताविषातामस्तोषातां हरिहरौ । तुष्टुवे । स्ताविता । स्तविता । स्तोता । स्ताविषीष्ट । स्तोषीष्ट । स्ताविष्यते । स्तोष्यते । अस्ताविष्यत । अस्तोष्यत ।

स्मर्यते । अर्यते । संस्क्रियते ।

नेण् तपो ऽनुतापे ॥ ४ ॥

अन्वतप्त ।

दीयते ।

यन् ञिणत्कृद्इण्य् आतः ॥ ५ ॥

आदन्तानां पन् स्यात् ञिति णिति कृति इणि च । अदायि । अदायि-
पातान् ।

अदिपातान् । हन्यते । अघानि । अवधि । अघानिपातान् । अवधिषा-
तान् । अहसातान् । गृह्यते । अग्राहि । अग्राहिपातान् । अग्रहीषा-
तान् । दृश्यते । अदर्शि । अदर्शिपातान् । अदृक्षातान् । शम्यते नो-
न्हो मुकुन्देन । अशमि । अशामि । अशमिपातान् । अशामिपातान् ।
अशमयिपातान् । अशामयिपातान् ।

भावे मायन् ॥ ६ ॥

मस्यान्ते वचनं भावे प्रयुज्यते । मया भूयते । अभावि । बभूवे । बुभूवे ।
भाविता । भविता । शम्यते मुनिना । अशमि । अक्रामि । अवामि ।
आचामि । आङः किम् । अचमि । व्यश्रमि । व्यश्रामि । अवधि । अ-
जागारि । णौ तु अजागरि । अजागारि ।

भञ्जग्गिलम्भो वेणाणोर् नलोपः ॥ ७ ॥

अभाजि । अभञ्जि । अलाभि । अलम्भि । णौ तु प्रालम्भि ।

ठवट् ठयो ऽठे ॥ ८ ॥

ठन् एव यत्र प्राप्तं ठयः । स च ठवत् स्यात् । न तु ठे सति । तथा च ।

क्रियमाणां तु यत्कर्म स्वयमेव प्रसिध्यति ।
सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः ॥

स्वयमेव काष्ठं भिद्यते । अभेदि ।

कुपिरञ्जः श्यन्पे वा रे ॥ ९ ॥

कुप्यति । कुप्यते । रज्यति । रज्यते ।

वेण् अनुदुह्नः ॥ १० ॥

अन्तादु दुहश्च इण् स्याद्वा ठये । अकारि । अकृत । अदोहि । अदु-
ग्ध ।

न तपरुधः सठपचदुहः ॥ ११ ॥

तपो रुधः सठाभ्यां पचदुहाभ्यां च इण् न स्याड् ठघे। अतप्त। अरुद्ध। अपक्ताम्रः फलम्। अदुग्ध गौर्दुग्धम्। अत एवानयोर् ठे ऽपि ठवत्त्वम्।

सन्श्रन्थग्रन्थब्रूकॄगॄदुहनमभूषार्थाद् यक् च जिस्रुश्रिमाठात् त्व् अमिण् ॥ १२ ॥

सन्नन्ताद् एर् इण् यक् च न स्याड् ठघे। ज्यन्तादेस्तु मिण्वर्जम्। चिकीर्षते। अचिकीर्षिष्ट। श्रथ्नीते। अश्रन्थिष्ट। ग्रथ्नीते। अग्रन्थिष्ट। ब्रूते। अवोचत। किरते। अकीर्ष्ट। गिरते। अगीर्ष्ट। दुग्धे। अधुक्षत। अदुग्ध। नमते। अनंस्त। तंसते। अतंसिष्ट। कारयते। अचीकरत। अकारिष्ट। अकारयिष्ट। स्नुते। अस्नाविष्ट। अस्नोष्ट। श्रयते। अशिश्रियत। अश्रायिष्ट। अश्रयिष्ट। आहते। आवधिष्ट। आघानिष्ट। आहत।

न्यादिज्यन्ताठगत्यर्था मुख्ये ठे ठत्यमाप्नुयुः। गौणे याचादयः। अन्ये तु यथेष्टं द्विठधुष्विति ॥ १३ ॥

निन्ये विजनम्। अजागरि रजनिम्। अगमि मदम्। अयाचि संभोगम्। गोपी ह्यवमकार्यत भावश्चैनामनन्तेन।

॥ इति ठभावपादः ॥ २४ ॥

भवद्भूतभव्ये त्रिशः क्याद्याः ॥ १ ॥

क्याद्याः क्तयस्तिस्रस्तिस्रः क्रमाद्वर्तमानातीतभविष्यत्सु कालेषु स्युः।

शेते स चित्तशयने मम मीनकूर्म-
कोलो ऽभवद्गृहरिवाममजामदग्न्यः।
यो ऽभूद्बभूव भरताग्रजकृष्णबुद्धः
कल्की सतां च भविता प्रहरिष्यते ऽरीन् ॥

की स्मेनातीते ॥ २ ॥

हन्ति स्म रावणं रामः ।

यावत्पुराभ्यां भव्ये ॥ ३ ॥

यावद्भवति कल्की । पुरा दृश्यते कल्की ।

कदाकर्हिभ्यां वा ॥ ४ ॥

कदा पश्यामि गोविन्दं कर्हि द्रक्ष्यामि शंकरम् ।

किम्भिर् लिप्सायाम् ॥ ५ ॥

डतरडतमन्तयत्तस्य किमो द्वैर्योगे भव्ये क्तौ वा स्याल्लिप्सायाम् । कतरः कतमः को वा भिक्षां दास्यति ददाति वा ।

लिप्स्यसिद्धौ ॥ ६ ॥

लिप्स्येनान्नादिना स्वर्गादेः सिद्धौ सत्यां भव्ये क्तौ वा स्यात् । यो भिक्षां ददाति दास्यति वा । स स्वर्गं याति यास्यति वा ।

ग्याशंसयोः ॥ ७ ॥

ग्या अर्थे प्रेष्यादावाशंसायां च भव्ये क्तौ वा स्यात् । गुरुश्चेदायाति आयास्यति वा । अथ त्वं वेदमधीष्व । वयं तर्कमधीमहे ।

जात्वपिभ्यां सदा लेपे ॥ ८ ॥

जातु निन्दसि गोविन्दमपि निन्दसि शंकरम् ।

कथमा त्यौ च वा ॥ ९ ॥

कथं निन्दस्यजं निन्देः शंभुं देवीं निनिन्दिथ ।

किम्भिः त्योतौ ॥ १० ॥

को निन्दिष्यति लक्ष्मीशं निन्देत्कतर ईश्वरम् ।

अन्यत्राश्रद्धामर्षे ॥ ११ ॥

न श्रद्धे मर्षये नो यत्र गर्हिष्यते हरिम् ।
शिवं गर्हेत को निन्देद्विष्णुं निन्दिष्यतीश्वरम् ॥

किंकिलास्त्यर्थाभ्यां ती ॥ १२ ॥

त्वं किंकिल हृषीकेशं निन्दिष्यसि न मंस्यसे ।

महादेवं चास्ति नाम श्रद्दधे नो न मर्षये ॥

जातुयद्यदायदिभिः खी ॥ १३ ॥

न मर्षये श्रद्दधे नो जातु निन्देज्जनार्दनम् ।

यच्चयत्राभ्यां क्षेपचित्रे च ॥ १४ ॥

यच्च निन्देद्विभुं गर्हेच्चित्रं श्रद्धां न मर्षये ।

चित्रे त्य् अयदिना ॥ १५ ॥

यदिवर्जितेन शब्दमात्रेण योगे चित्रे गम्ये सदा ती स्यात् ।

चित्रं द्रक्ष्यति नामान्धः कृष्णं पश्येद्यदीश्वरम् ।

वाढे ऽप्युताभ्यां खी ॥ १६ ॥

अपि हन्यादघं शंभुरुत दुष्खं जयेदजः ।

प्रौढ्या संभावने ॥ १७ ॥

प्रौढिः सामर्थ्यम् । संभावनं क्रियासु योग्यताध्यवसायः । प्रौढिहेतुक-संभावनोपाधिके ऽर्थे वर्तमानाद् धोः सदा खी स्यात् ।

अपि हिंस्याज्जगद्गाथो महापातकपञ्चकम् ।

श्रद्धार्थैर्वायदि ॥ १८ ॥

श्रद्दधे ऽजं भजेः प्राणैर्भक्ष्यसे ऽजं बभक्थ तम् ।

भव्ये वा फलहेत्वोः ॥ १९ ॥

शं यायाच्चेद्गमेदीशं श्रीशं नंस्यति यास्यति ।

कामोक्ते ऽकच्चिति ॥ २० ॥

कामं भजेद्गवान्भर्गं कच्चिदर्चिष्यते शिवम् ।

गी चेच्छार्थैः ॥ २१ ॥

इच्छामि शर्वं सेवेत श्रीपतिं सेवतां भवान् ।

कानेोक्त इति किम्। इच्छन्करोति।

विधिनिमन्त्रणामन्त्रणाध्येषणासंप्रश्नप्रार्थनाप्रेष्यप्राप्तकालादौ ॥ २२ ॥

सदा योगे कुर्यात्। इह भुञ्जीत भवान्। इह शयीत भवान्। पुत्रमध्यापयेद्भवान्। किं भो वेदमधीयीय। उत तर्कमधीयीय। भो भोजनं लभेय। प्रेषितस्त्वं गङ्गां गच्छेः। प्राप्तस्ते कालः। तपः कुर्याः। एवं गी।

सनर्धनाशिषेोर्र गी ॥ २३ ॥

अशक्ये ऽध्यवसायः सनर्धना। सिन्धुमपि शोषयाणि।

तुह्येास् तातङ् वाशिषि ॥ २४ ॥

पातु पाताद्वा शिवः। पाहि पाताद्वा शिवः।

मुङ्र्भृशार्थे हि त स्व धन् ॥ २५ ॥

पौनःपुन्ये ऽतिशये चार्थे सदा स्या हि त स्व धम् स्युः। मुङ्र्भृशं वा लुनाति लुलाव लविष्यति वा। लुनीहि लुनीत लुनीध्व लुनीध्वम्।

मास्मेन घीट्यौ ॥ २६ ॥

मास्मशब्देन येागे सदा घीट्यौ स्तः। मास्म भवदुष्यम्। मास्म भूल्लोकः।

मा टी वा ॥ २७ ॥

मायेागे सदा टी स्याद्वा। मा विस्रंसीत् सुखम्। मा विस्रसतु। मा विस्रंस्यति।

प् आशिषि ॥ २८ ॥

जीव्याच्चिरं सङ्घनः।

स्मैषम् त्य् अयद् वतीते ॥ २९ ॥

स्मरणार्थयेागे ऽतीते काले ती स्यात्। यच्चाव्ययं प्रयुज्यते। व्यपवादो ऽयम्।

स्मरन्येनं नंस्यसीशं यत्स्मारस्यानमः शिवम्।

वानेकस्मार्ये ॥ ३० ॥

अनेकस्मार्ये प्रयोक्तरि सति स्मरणार्थैर्योगे ऽतीते काले ती वा स्यात्।

ध्यायसीदं यदीशानं द्रक्ष्यति स्तोष्यते भवान्।

ध्वर्थासंभवे थी ॥ ३१ ॥

धोरर्थस्यानिष्पत्तौ थी स्यात्। ज्ञानं चेदभविष्यत्। सुखमभविष्यत्।

लियुष्मदस्मदि त्यादि त्रिशः ॥ ३२ ॥

लौ युष्मदि अस्मदि च त्यस्यार्थे प्रयुज्यमाने त्यादीणि त्रीणि त्रीणि क्रमात्स्युः।

जानाति यो ऽखिलं यं च न जानीतः श्रुतिस्मृती।
शास्त्राणि च न जानन्ति स मया सेव्यते शिवः ॥
भासि त्वमेको विश्वेश भाथो ऽच्युतशिवौ युवाम्।
भाथ यूयं हरिहरब्रह्माद्याः पाह्यनेकशः ॥
एको भवामि स्म भवे ऽहमादौ दारैरथोभौ स्म भवाव आवाम्।
वयं भवामो बहवः स्म पुत्रैस्त्वद्माययाद्यापि विभो प्रसीद ॥

॥ इति क्तिपादः ॥ २५ ॥

॥ इति त्याद्यन्ताधिकारः समाप्तः ॥

कृद् धोः कभावे ॥ १ ॥

वक्ष्यमाणस् त्यः कृत्संज्ञः स्यात्। स च धोः परः स्यात्। स च के भावे च स्यात्।

सरूपो बाध्यः ॥ २ ॥

समानरूपस् त्यः कृता बाध्यते। न त्वसरूपः।

तव्यानीयया ढभावे ॥ ३ ॥

धोः यप् एते स्युर् ठभावे । चेतव्यम् । चयनीयम् । चेयं पुण्यम् । भ-वितव्यम् । भवनीयम् । भव्यं त्वया ।

नो ऽचो ऽन्तरदुर्गैः प्रागवद् णो ऽख्याभाभूपूक्मगमप्यायवेपानिन्वादेरिदितो ञिन्हसादीनुङन्त् तु वा ॥ ४ ॥

अन्तरो दुर्वर्जगेश्च परस्य णविधिहेतौ सति नस्याचः परस्य णः स्यात् । न तु ख्यादेर् इङ्खादिवर्जेदितश्च । ञ्यन्ताद् ह्सादीनुङन्तु वा । अन्तर्या-णीयम् । प्रयाणीयम् । प्रयापणीयम् । प्रयापनीयम् । प्रकोपणीयम् । प्रकोपनीयम् । ख्यादेस्तु प्रख्यापनीयम् । प्रख्यानीयम् । प्रभापनीयम् । प्रभवनीयम् । प्रपवनीयम् । प्रक्मनीयम् । प्रगमनीयम् । प्रप्यायनीयम् । प्रवेपनीयम् । प्रकम्पनीयम् । इङ्खादेस्तु प्रेङ्खणीयम् ।

खनाद् टेर् ए ये ॥ ५ ॥

खन आदन्तस्य च टेर् एः स्याद् ये परे । खेयम् । देयम् ।

घ्यण् ओत आवश्यके ॥ ६ ॥

उवर्णान्तादवश्यंभावे ऽर्थे घ्यण् स्याद् ठभावे । विप्रेण शुचिना भाव्यम् ।

ह्सृयुआसोः ॥ ७ ॥

ह्सन्ताद् ऋवर्णान्ताद् यौतेर् आसुनोतेश्च घ्यण् स्याद् ठभावे । वाक्यम् । यात्यम् । ग्रन्थ्यम् । वर्ण्यम् । कार्यम् । याव्यम् । आसाव्यम् ।

चजोः कगौ घित्य् असेनन्तगहाद्यजगत्यर्थवञ्चान् ॥ ८ ॥

घिति परे चजोः कगौ स्तः । न तु सेनन्तादेः । पाक्यम् । रोग्यम् । ग-तौ तु वञ्च्यम् । अन्यत्र वङ्क्यं काष्ठम् ।

नावश्यके त्यजयजप्रवचां च घ्यणि ॥ ९ ॥

आवश्यके ऽर्थे एषां च चजोः कगौ न स्तो घ्यणि । अवश्यं पाच्यम् । त्याज्यः । याज्यः । प्रवाच्यम् ।

भक्षवचानिप्रयुजो ऽन्नाशब्दशक्ये ॥ १० ॥

भुजो भक्ष्ये ऽर्थे वचो ऽशब्दे ऽर्थे निप्रपूर्वस्य युजः शक्ये ऽर्थे चजोः कगौ न स्तो घ्यणि । भोज्यमन्नम् । वाच्यम् । नियोज्यः । प्रयोज्यः । एषु किम् । भोग्या भूः । वाक्यं पदसमुदायः । नियोक्तुमर्हतीति नियोग्यः प्रभुः ।

पाय्यधाय्यप्रणाय्यानाय्यकुण्डपाय्यसंचाय्यराजसूयसांनाय्यनिकाय्यपरिचाय्योपचाय्यचित्याग्निचित्यासमूह्यामावास्यामावस्यायाज्याः ॥ ११ ॥

एते घ्यणन्ता निपात्यन्ते । पाय्यं मानम् । दधात्यग्निमिति धाय्या सामिधेनी । धाय्या ऋत्विजः । प्रणाय्यो ऽसंमतः प्रियो वा । आनाय्यो दक्षिणाग्निः । कुण्डैः पीयते ऽत्र सोम इति कुण्डपाय्यः क्रतुः । संचाय्यः क्रतुः । राज्ञा सूयते राजसूयः क्रतुः । सांनाय्यं हविः । निकाय्यो निवासः । परिचाय्यो ऽग्निः । उपचाय्यो ऽग्निः । चित्यो ऽग्निः । अग्नेश्चयनमग्निचित्या । समूह्यो ऽग्निः । संवाह्य इत्यर्थः । अमा सह वसतो ऽस्यां चन्द्रार्काविव्यमावास्या । अमावस्या । यजत्यनयेति याज्या । निपातो ऽर्थविशेषे ।

पुशकसहतकचतयतशसो ऽचमत्रपरपलपत्रपदभो यो भजत्रपयजानमस्तु वा ॥ १२ ॥

पवर्गान्तात् शकादेश्च चमादिवर्जाद् यः स्याद् घ्यणर्थे । भजादेस्तु वा । रम्यम् । शक्यम् । सह्यम् । तक्यम् । चत्यम् । यत्यम् । शस्यम् । भज्यम् । भाग्यम् । त्रप्यम् । त्राप्यम् । यज्यम् । याज्यम् । आनम्यम् । आनाम्यम् । चमादेस्तु आचाम्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । दाभ्यम् । अनकारनिर्देशात् ।

ण्य् आलभो मुण् ॥ १३ ॥

आलम्भ्या गौः ।

उपात् स्तुतौ ॥ १४ ॥

उपपूर्वस्य लभो मुण् स्याद् यकारे प्रशंसायाम् । उपलम्भ्यः साधुः । स्तुतौ किम् । उपलभ्यमस्मात्किंचित् ।

गदमदयमचराचरो ऽगेर् यः ॥ १५ ॥

अगिभ्य एभ्यो यः स्याड् ढभावे । गद्यम् । मद्यम् । यम्यम् । चर्यम् । आचर्यम् । अगेः किम् । प्रगाद्यम् । अभिचार्यम् ।

पण्यावद्यवर्याचार्यवह्यजय्यक्षय्यक्रय्यार्योपसर्याजर्यम् ॥ १६ ॥

एते यान्ता निपात्यन्ते । पण्यं विक्रेयम् । अवद्यमनिष्टम् । वर्या कन्या । वर्यं श्रेष्ठम् । आचार्यो गुरुः । उह्यते ऽनेनेति वह्यं शकटम् । जेतुं शक्यं जय्यम् । एवं क्षय्यम् । क्रय्यं हट्टे प्रसारितम् । अर्यः स्वामी वैश्यो वा । उपस्रियत इत्युपसर्या ऋतुमती । न जीर्यतीत्यजर्यं संगतम् ।

दृभृजुषस्त्वृण्शास्ऋदुङ्वृञो ऽकृपचृतऋचपाणिसृजसमवसृजः क्यप् ॥ १७ ॥

द्रादेर् ऋकारोङो वृञश्च कृपादिवर्जात् क्यप् स्याड् ढभावे ।

स्वस्य तन् पिति ॥ १८ ॥

स्वान्तस्य तन् स्यात् पिति परे । आदृत्यः । भृत्यः । जुष्यः । स्तुत्यः । इत्यः । शिष्यः । वृध्यः । वृत्यः । कृपादेस्तु कल्प्यम् । चर्त्यम् । अर्च्यम् । पाणिसर्ग्या समवसर्ग्या रज्जुः ।

कृवृषमृजगुहदुहशंससंभृप्रत्यपिग्रहो वा ॥ १९ ॥

एभ्यः क्यप् स्याद्वा ढभावे । कृत्यं कार्यम् । वृष्यं वर्ष्यम् । मृज्यं मार्ग्यम् । गुह्यं गोह्यम् । दुह्यं दोह्यम् । शस्यं शंस्यम् । संभृत्यः संभार्यः । प्रतिगृह्यं प्रतिग्राह्यम् । अपिगृह्यमपग्राह्यम् ।

गृह्यविनीयविपूयजित्यासूर्यरुच्याव्यच्यभिद्योद्ध्यपुष्यसिध्यतिप्याज्ययुग्यकृष्टपच्यकुप्यभार्याः ॥ २० ॥

एते क्यबन्ता निपात्यन्ते । गृह्यं पदम् । कृष्णगृह्यः कृष्णवर्ग्यः । गृह्यो ऽस्वैरी । ग्रामगृह्या ग्रामबाह्याः । विनीयः कल्कः । विपूयो मुञ्जः ।

त्रित्या हलिः । सरतीति सूर्यः । एवं रुच्यः । अव्यध्यः । कूलं भिनत्तीति भिद्यो नदः । वार्युज्जतीति उद्यो नदः । कार्यं पुज्जातीति पुष्यो नक्षत्रम् । कार्यं साधयतीति सिध्यः । स एव तिष्यो ऽपि । आज्यं घृतम् । युग्यं वाहनम् । कृष्टे स्वयं पच्यत इति कृष्टपच्यो व्रीहिः । कुप्यं सुवर्णाद्यपाभ्यान्यो धातुविशेषः । भार्या वधूः । भार्या क्षत्रिया ।

लेः वदः वयवूयौ ॥ २५ ॥

लेः पराद् वदः वयवूयौ स्तो ऽभावे । ब्रह्मणा उद्यत इति ब्रह्मोद्या ब्रह्मवद्या कथा ।

मृषोद्यं नित्यम् ॥ २२ ॥

भूकृनः वयव् भावे न तप् च ॥ २३ ॥

लेः पराभ्यानाभ्यां भावे वयव् स्यात् । कृनो नस्य तप् च । ब्रह्मभूयं ब्रह्मत्वम् । ब्रह्मकृत्या ।

धोः केलिमो ऽवे ॥ २४ ॥

धोः केलिमः स्याद् ऽवे । स्वयमेव पच्यत इति पचेलिमास्ताण्डुलाः ।

ते त्याः शक्यार्हप्रेष्यानुज्ञाप्राप्तकाले वा ॥ २५ ॥

तव्यादयो त्यसंज्ञाः स्युः । ते च शक्यार्थेषु वा स्युः । वोढुं शक्यो वोढव्यो वहनीयो वाह्यः । स्तोतुमर्हः स्तोतव्यः स्तवनीयः स्तुत्यः । प्रेषितस्त्वम् । त्वया गन्तव्यं गमनीयं गम्यम् । अनुज्ञातस्त्वम् । त्वयाध्येतव्यमध्ययनीयमध्येयम् । प्राप्तस्ते कालः । त्वया ध्यातव्यं ध्यानीयं ध्येयम् ।

॥ इति त्यपादः ॥

तृणाकौ धे ॥ २६ ॥

धेस् तृणाकौ स्तो धे । करोतीति कर्ता । कारकः । दरिद्रायकः ।

गलेचोपक्रमाद्गह्वरकौ हे ॥ २७ ॥

एतौ निपात्येते ।

मार्ह्णात् क्रमो नेन् तृणः ॥ २८ ॥

प्रक्रान्ता । उपक्रान्ता । अन्यत्र क्रामिता ।

अह्लनन्दिपचादेर् णिन् अनान् घे ॥ २९ ॥

अह्लादेर् णिन् नन्द्यादेर् अनः पचादेर् अन् स्याद् घे । आह्ली । स्थायी । प्रयायिणी । नन्दनः । विचक्षणः । जनार्दनः । मधुसूदनः । लवनः । पचः । देवः । लेल्यः । लोलुवः । रोहयः । लोलूयः ।

चिक्लिदचक्रसचराचरचलाचलपतापतवदावदघनाघनपाटूपटा वा ॥ ३० ॥

एते ऽन्ता निपात्यन्ते । पक्षे क्लेदः । क्रसः । चरः । चलः । पतः । वदः । हनः । पटः ।

रात्रेर् मन् वा कृति ॥ ३१ ॥

रात्रिंचरः । रात्रिचरः । रात्रिमटः । रात्र्यटः ।

कॄगृज्ञाप्रीक्षिपः को दुहो घङ् च ॥ ३२ ॥

क्रादेर् क्षिपान्तस्य च कः स्याद् घे । तस्मिंश्च दुहो घङ् स्यात् । किरः । गिरः । ज्ञः । प्रियः । क्षिपः । भूरुहः । कामदुघा गौः ।

हनजनाद्गमादेर् डः ॥ ३३ ॥

हनो जन आदन्ताद् गमादेश्च डः स्याद् घे । शोकापहः । वराहः । सरसिजम् । पङ्कजम् । अजः । गोदः । द्विपः । प्रहः । आशुगः । नगः । अगः । गिरिशः । वारि चरतीति वार्मी हंसः ।

घेट्ध्मापाघ्राभ्यः शः ॥ ३४ ॥

एभ्यः शः स्याद् घे । उद्धयः । उत्पश्यः । उत्पिबः । उज्जिघ्रः । उद्धमः ।

साक्षिसातिचेतिविदिविधारिपारिलिम्पविन्दो ऽगेः ॥ ३५ ॥

अगिभ्य एभ्यः शः स्याद् घे । साद्यः । सातयः । चेतयः । वेद्यः । एतयः । धारयः । पारयः । लिम्पः । विन्दः । गोविन्दः । अरविन्दम् ।

डुनीभूह्वलाद्यासुसंस्रारु णो वा ॥ ३६ ॥

अगिभ्य एभ्यो णाः स्याद्वा घे । दावः । द्वः । नायः । नयः । भावः । भवः । ह्वालः । ह्वलः । चालः । चलः । आस्रावः । आस्रवः । संस्रावः । संस्रवः ।

घासव्यधेणात्तनद्दावद्वसः ॥ ३७ ॥

एभ्यो णाः स्याद् घे । घासः । व्याधः । अत्यायः । अवतानः । दायः । धायः । अवहारः । अवसायः ।

नृत्खनरञ्जः पकः ॥ ३८ ॥

एभ्यः पकः स्याद् घे । नर्तकी । खनकी । रञ्जकी ।

गो णानद्भावौ ॥ ३९ ॥

गायतेरेतौ घे स्तः । गायनी । गायकः ।

ह्रायनः ॥ ४० ॥

अयं निपात्यते । भावं ह्रातीति ह्रायनो वर्षः । अम्बु ह्रातीति ह्रायनो व्रीहिः ।

प्रुदुसुसृत्वो ऽकः ॥ ४१ ॥

एभ्यो ऽकः स्याद् घे । प्रवकः । द्रवकः । स्रवकः । सरकः । लवकः ।

आशिषि ॥ ४२ ॥

जीवतादिति जीवकः ।

नाम्न्यन्येऽपि तिक् च ॥ ४३ ॥

एभ्य आशिषि अन्येऽपि कृताः स्युः । तिक् च संज्ञायाम् । देवरातः । रक्तिः ।

सतिसातौ वा सक्तिश्च ॥ ४४ ॥

एतौ निपात्यौ ।

ढात् षण् ॥ ४५ ॥

ढात् पराद् धोः षण् स्याद् घे । कुम्भकारः । अघटं घटं करोतीति घटीकारः ।

हनचरगप् टक् ॥ ४६ ॥

ढात् पराद् हनश् चरो गायतेश्च टक् स्याद् घे । पापघ्नः । कुरुचरः । सामगः ।

सृकुप् टः ॥ ४७ ॥

ढात् पराभ्यामाभ्यां टः स्याद् घे । पुरःसरी । यशस्करी विद्या । भास्करः सूर्यः । क्षपाकरश्चन्द्रः । कर्मकरी दासी ।

शकृत्स्तम्बाद् दृतिनाथात् फलेरजोमलाद् देववातात् कृह्ग्रहाप इः ॥ ४८ ॥

एभ्यः परेभ्यः क्रमादेभ्य इः स्याद् घे । शकृत्करिर्वत्सः । स्तम्बकरिर्व्रीहिः । दृतिहरिः श्वा । नाथहरिः पशुः । फलेग्रहिः । रजोग्रहिः । मलग्रहिः । देवापिः । वातापिः ।

कुक्ष्यात्मोदराद् भुः खिः ॥ ४९ ॥

एभ्यः पराद् भृञः खिः स्याद् घे ।

खित्य् अव्याज्अरुषो मन्स्वौ द्वीक्वान्तत्वं त्व् एकाज्इचः ॥ ५० ॥

व्यवर्जस्याजन्तस्यारुषश्च मन् स्वश् च स्यात् । एकाज्इचस् तु द्वीक्वान्तत्वं स्यात् खिदन्ते धौ परे । कुक्षिंभरिः । आत्मंभरिः । उदरंभरिः ।

खश् एजेः ॥ ५१ ॥

ढात् पराद् एजयतेः खश् स्याद् घे । जनमेजयः ।

मन्यात् स्वार्थे ॥ ५२ ॥

ढात् पराद् मन्यात् खश् स्याद् घे । आत्मानं गां मन्यते गांमन्यः । श्रियंमन्या ।

मुञ्जकूलास्यपुष्पाद् धेटः ॥ ५३ ॥

एभ्यः पराद् धेटः खश् स्याद् घे । मुञ्जंधयः । कूलंधयः । आस्यंधयः । पुष्पंधयः । मुञ्जंधयी । धेटष् टित्वाद् ईप् ।

नाडीशुनीस्तनकरमुष्टिपाणिनासिकाद् ध्मश्च ॥ ५४ ॥

एभ्यः पराद् ध्मो धेटश्च खश् स्याद् घे । नाडिंधमः । नाडिंधयः ।

घटीखारीवाताद् विध्वरुस्तिलाद् असूर्योग्राल् ललाटाद् मितनखमानाद् ध्मातुदृदृशतपपचः ॥ ५५ ॥

एभ्यः परेभ्यः क्रमादेतेभ्यः खश् स्याद् घे । घटिंधमः । खारिंधमः । वातंधमः । विधुंतुदः । अरुंतुदः । असूर्यंपश्यः । उग्रंपश्यः । ललाटंतपः । मितंपचः । अल्पंपचः । नखंपचः । मानंपचः । द्रोणंपचः ।

कूलाद् उद्रुज्उद्वहः ॥ ५६ ॥

कूलादाभ्यां खश् स्याद् घे । कूलमुद्रुजा नदी । कूलमुद्वहः समुद्रः ।

प्रियवशाद् भयर्तिमेघात् सर्वकूलाब्भ्रकरीषाद् वदकृकषः खः ॥ ५७ ॥

एभ्यः परेभ्यः क्रमादेतेभ्यः खः स्याद् घे । प्रियंवदः । वशंवदः । भयंकरः । ऋतिंकरः । मेघंकरः । सर्वंकषः । कूलंकषः । अब्भ्रंकषः । करीषंकषः ।

क्षेमप्रियमद्रात् कुर् वा ॥ ५८ ॥

एभ्यः कृञः खो वा स्याद् घे । क्षेमंकरः । प्रियंकरः । मद्रंकरः । पक्षे क्षेमकारः ।

भावधे त्व् आशिताद्भुवः ॥ ५९ ॥

आशिताद् भुवः खः स्याद् घे भावे धे च । आशितं भवत्यनेनेति आशितंभव ओदनः । आशितंभवं वर्तते ।

तॄभृवृदॄजिधृतपयमदममदलिहगमसहाजो नाम्नि ॥ ६० ॥

एभ्यः खः स्यात्संज्ञायाम् । रथेन तरतीति रथंतरः । विश्वंभरः । पतिंवरा । पुरंदरः । भगंदरः । धनंजयः । वसुंधरा । शत्रुंतपः । वाचंयमः ।

अरिंदमः । इरया माद्यतीति इरंमदः । वहंलिहः । भुजंगमः । सर्वंसहः । वातमजः ।

शर्धंजहोरंगमोरगतुरंगमतुरगविहंगमविहगभुजंगमभुजगपतंगमपतगप्लवंगमप्लवगाः ॥ ६१ ॥

एते खान्ता निपात्यन्ते । शर्धं जहातीति शर्धंजहो माषः । उरसा गच्छतीति उरंगमः । उरगः । विहायसा गच्छतीति विहंगमः । विहगः ।

नग्नपलितप्रियान्धस्थूलसुभगाढ्यात् कुः खनट् धे च्व्यर्थे ॥ ६२ ॥

एभ्यः परात् कृञः खनट् स्याद् धे च्व्यर्थे । अनग्नो नग्नः क्रियते ऽनेनेति नग्नंकरणम् । पलितंकरणम् । प्रियंकरणम् । अन्धंकरणम् । स्थूलंकरणम् । सुभगंकरणम् । आढ्यंकरणम् ।

भुवो घे खिष्णुखुकञौ ॥ ६३ ॥

नग्नादिभ्यः पराद् भुवश् च्व्यर्थ एतौ घे स्तः । नग्नंभविष्णुः । नग्नंभावुकः ।

ढाद् भजवहसहो विण् ॥ ६४ ॥

ढात् परेभ्य एभ्यो विण् स्याद् घे । सुखभाग् । प्रष्ठवाड् । तुरापाड् ।

अनडुच्श्वेतवाहादिः ॥ ६५ ॥

एते विणन्ता निपात्यन्ते । अनो वहतीति अनड्वान्वृषः । श्वेतैरुह्यते श्वेतवा इन्द्रः । अवयजतीति अवयाः । उक्थानि शंसतीति उक्थशा यजमानः । पुरोडा हविः पुरोडाशः ।

क्रमगमखनसनजनो विट् ॥ ६६ ॥

एभ्यो विट् स्याद् घे ।

विड्वनोरु ञ ॥ ६७ ॥

घोरत्तस्य डा स्याद् विटि वनि च । उदधिक्राः । अग्रेगाः । विपश्चाः । गोपाः । अब्जाः ।

त्रासृडसृङ्सृमन्क्वनिब्वनिब्विच्क्विपः ॥ ६८ ॥

घोरेते स्युः । नीयते ऽनेनेति नेत्रम् । दंष्ट्रा । नष्ट्री । योक्त्रम् । योत्रम् । उरुव्यचाः । नृचक्षाः । रक्षः । चक्षुः । सर्पिः । सुष्ठु ददातीति सुदामा । सुगन्मा ।

क्वब्रतोर् नेम् ॥ ६९ ॥

कृतो क्वब्रस्य ब्रस्य तोम् च इम् न स्यात् । सुशर्मा । सुपीवा । प्रातरित्वा । सुत्वा । भूरिदावा । वारित्रावा । सोमपाः । रेट् । रोट् । क्रुङ् । युङ् । प्रत्यङ् । अक्षणूः । मित्रशीः । आशीः । गीः । वङ्भृङ् । घृतस्पृक् । शल्याद् । क्रव्याद् ।

छादेस् त्रमन्क्विसघे स्वः ॥ ७० ॥

छादयतेः स्वः स्यात् त्रे मनि क्वाव् इसि घे च । छत्रम् । छद्म । छदिः । तनुच्छद् । उरश्छदः ।

ददृन् तुङ्वाक्प्राट्श्रीस्रूद्रुव्यायतस्तूकटप्रूपरिव्राड्दिद्युत्जगद्दधृक्स्रग्उष्णिहः ॥ ७१ ॥

एते क्विबन्ता निपात्यन्ते । दीर्यतीति ददृत् । तुल्होत्यनयेति तुङः । वक्त्यनयेति वाक् । पृच्छतीति प्राट् । अयत्येना श्रीः । स्रवतीति स्रूः । द्रवतीति द्रूः । नवतीति नूः । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । परिव्रजति परिव्राट् । द्योतते दिद्युत् । गच्छतीति जगत् । धृष्णोतीति दधृक् । सृज्यत इति स्रग् । ऊर्ध्वं स्निह्यतीति उष्णिग् ।

त्रि घें ऽस्यः ॥ ७२ ॥

अस्यो त्रि घः स्यात् । मित्रं ह्वयतीति मित्रहुः ।

वेश्याप्यां वौ ॥ ७३ ॥

एषां जि र्घः स्यात् क्वौ । ऊः । धीः । आपीः । ध्याप्योर् अत एव जिः ।
जन्ऊङो झस्य् अणौ चातिकि ॥ ७४ ॥

जनन्तस्योङो र्घः स्याद् अणौ झसे क्वौ च । न तु तिकि । प्रशान् ।
श्रिवावमवज्वरत्वरो व् ऊङ् उङा जमे च ॥ ७५ ॥

एषां व उङा सह ऊट् स्यात् क्वौ झसि अणौ जमे च । श्रूः । ऊः ।
मूः । जूः । तूः ।
राच् छ्वोर् लोपः ॥ ७६ ॥

रात् परयोश् छकारवकारयोर् लोपः स्यात् क्वौ झस्य् अणौ जमे च ।
मुर्छा मूः । धुर्वी धूः ।
आद् ऊटो व्रिः ॥ ७७ ॥

अवर्णात् परस्योटो व्रिः स्यात् । जनानवतीति जनौः ।
यममनतनगमो ऽन्तलोपः क्वौ ॥ ७८ ॥

संयत् । परिमत् । परीतत् । संगत् ।
श्रिविश्वग्देवस्य टेर् अद्र्य् अन्चौ क्वौ ॥ ७९ ॥

श्रेर् विश्वचो देवस्य च टेर् अद्रिः स्यात् क्विबन्ते ऽञ्चतौ । सर्वानञ्चती-
ति सर्वद्र्यङ् । विश्वद्र्यङ् । देवद्र्यङ् ।
अमुद्र्यङ् अमुमुयङ् अदमुयङ् अदद्र्यङ् ॥ ८० ॥

अमुमञ्चतीत्यर्थ एते निपात्यन्ते ।
सह सं तिरः सध्रि समि तिरि ॥ ८१ ॥

एषां क्रमादेते स्युः क्विबन्ते ऽञ्चतौ । सध्र्यङ् । सम्यङ् । तिर्यङ् ।
वीरुहो धङ् क्वौ ॥ ८२ ॥

वीरुद् ।
तदादिभवत्समानान्योपमानाद् दृशप् टक्सक्क्विपो ढे ॥ ८३ ॥

तदादेर् भवतः समानाद् अन्यस्माच्चोपमानाद् दृश एते स्युर् ढे ।

श्रेर् ङा ॥ ८४ ॥

श्रेर् ङा स्याट् टगाद्यन्ते दृशि । स इव दृश्यते तादृशः । तादृक्षः । तादृक् । भवादृशः ।

समानेदंकिमदः सेक्य्अमूः ॥ ८५ ॥

एषां स्थाने स ई की अमू एते क्रमात्स्युष् टगाद्यन्ते दृशि । सदृशः । ईदृशः । कीदृशः । अमूदृशः ।

अन्यादृशः ।

॥ इति तृन्नादिपादः ॥

क्तक्तवतू भूते ढभावे घे ॥ ८६ ॥

घोर् अतीते ऽर्थे ढभावे क्तः । घे क्तवतुः स्यात् । उकाव् इतौ । स्तुतस्त्वया विष्णुः । स्नातं मया । विष्णुर्विश्वं कृतवान् ।

क्षे र्घो ऽढे भावदैन्याक्रोशे तु वा ॥ ८७ ॥

क्षे र्घः स्यात् । न तु ढे । भावदैन्याक्रोशे तु वा । तयोः परयोः ।

सूल्वाद्य्ओदिद्द्रक्षीयलस्यातो न तो ऽपृमुर्ह्ख्याध्यामदो दश् च ॥ ८८ ॥

स्वादेर् ल्वादेर् ओकारेतो दान्ताद् रेफात् क्षीशब्दाद् यलस्ययुक्ताकारान्तात् परयोस् तयोस् तस्य नः स्यात् । पूर्वस्य च दस्य नः । न तु प्रादिभ्यः । क्षीणः । क्षीणवान् । अढे किम् । क्षितः कामो मया ।

वृङ्श्रिञ्ऊर्णोः कितो नेम् ॥ ८९ ॥

वृञो वृङ ऋदन्ताद् उवर्णान्ताच् श्रिञ ऊर्णोश्च कित इम् न स्यात् । सूनः । सूनवान् ।

दीनः । दीनवान् । लूनः । जीनः । रुग्नः । भुग्नः । प्रह्लीणः । मिन्नः । निर्विण्णः । प्यानः । ग्लानः । श्राणः । प्रादेस्तु पूर्तः । मूर्तः । ख्यातः । ध्यातः । मत्तः ।

वृतः । भृतः । श्रितः । ऊर्णुतः ।

दिव्यूश्रन्थश्यो ऽत्रिगीषात्रास्पर्शे न तस् तयोः ॥ ९० ॥

दिवेः श्रत्रिगीषायाम् श्रश्चतेः श्रन्थे श्यायतेः श्रस्पर्शे ऽर्थे तयोस् तस्य नः स्यात् । श्राद्यूनः । सनक्रः ।

घनस्पर्शे श्यो त्रिः ॥ ९१ ॥

घने स्पर्शे चार्थे श्यो त्रिः स्यात् तयोः । शीनं घृतम् । त्रिगीषादौ तु शूतम् । उदक्तमुदकं कूपात् । शीतं त्रलम् । घनस्पर्शे किम । संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः ।

प्रतेः ॥ ९२ ॥

प्रतिपूर्वस्य श्यो त्रिः स्यात् तयोः । प्रतिशीनः ।

श्रभ्यवाद् वा ॥ ९३ ॥

श्रभ्यवात् परस्य श्यो त्रिः स्याद्वा तयोः । श्रभिशीनः । श्रभिश्यानः । श्रवशीनः । श्रवश्यानः ।

पिजो ह्वे न तो ग्रासे ॥ ९४ ॥

पिजः परस्य तयोस् तस्य नः स्याड् ह्वे ग्रासे वाच्ये । सिनो ग्रासः स्वयमेव ।

पूजो नाशे ॥ ९५ ॥

पूनो नष्टः । श्रन्यत्र पूतः ।

ङ्यो र्घश्च ॥ ९६ ॥

श्राभ्यां तयोस् तस्य नः स्यात् । तयो र्घश्च । हूनः । गूनः ।

व्रश्चेः कड् च ॥ ९७ ॥

व्रश्चेस् तयोस् तस्य नः स्यात् । व्रश्चेः कड् च । वृक्णः ।

क्ष्रीग्रात्रोन्दनुदविन्दो वा ॥ ९८ ॥

एभ्यस् तयोस् तस्य नः स्याद्वा । ह्रीणः । ह्रीतः । घ्राणः । घ्रातः । त्राणः । त्रातः । उन्नः । उत्तः । नुन्नः । नुत्तः । विन्नः । वित्तः ।

क्षैप्रुप्पचो मकवः ॥ ९९ ॥

एभ्यस् तयोस् तस्य म क व एते क्रमात्स्युः । क्षामः । प्रुष्कः । पक्वः ।

प्रस्त्यो म वा जिप्र् च ॥ १०० ॥

प्रस्त्यस् तयोस् तस्य मः स्याद्वा । तस्य जिप्र् च । प्रस्तीमः । प्रस्तीतः । प्रात् किम् । संस्त्यानः ।

निर्वाणभित्तर्णवित्तपुल्लोत्पुल्लसंपुल्लप्रपुल्लक्षीवकृशपरिकृशोल्लाघाः ॥ १०१ ॥

एते क्तान्ता निपात्यन्ते । निर्वाणः शान्तः । निर्वाणं मुक्तिः । भित्तं खण्डम् । ऋणं विशोध्यम् । वित्तं धनम् । वित्तः प्रतीतः । पुल्लो विकसितः । एवमुत्पुल्लसंपुल्लप्रपुल्लाः । क्षीवो मत्तः । कृशस्तनुः परिकृशश्च । उल्लाघो नीरुजः ।

क्षुधवसपूजार्थान्चागार्ध्यार्थलुभः क्त्वप् चेम् ॥ १०२ ॥

एभ्यः परयोस् तयोः क्त्वप् चेम् स्यात् । क्षुधितः । उषितः । अञ्चितः । लुभितः । गतौ तु अक्तः । गार्ध्ये तु लुब्धः ।

पूक्लिशवमजपव्याश्वसस् तयोर्वा ॥ १०३ ॥

एभ्यस्तयोर् इम् स्याद्वा ।

पूशीधृषमिदक्ष्विदस्विदक्षमार्थमृषां सेमोर् णुः ॥ १०४ ॥

एषां णुः स्यात्तयोः सेमोः । पवितः । पूतः ।

क्लिशितः । क्लिष्टः । वमितः । वान्तः । जपितः । जप्तः । विश्वसितः । विश्वस्तः । आश्वसितः । आश्वस्तः । शयितम् । धर्षितम् । मेदितम् । क्ष्वेदितम् । स्वेदितम् । मर्षितम् । क्षमार्थः किम् । अपमृषितं वाक्यम् ।

भावादिढे वोदुङो ऽव्वतः ॥ १०५ ॥

विद्धितोप उडुङो भावादिठयोर् गुर् वा स्यात्तयोः सेनोः। द्योतितं द्युतितं तेन। अनपस्तु क्षुधितम्।

लोपो ञेः ॥ १०६ ॥

ञेर् लोपः स्यात्तयोः सेनोः। भावितः। भावितवान्।

नेम् डीश्वीदिद्वेनो ऽपत्यनेकान्तुनिष्कुषः ॥ १०७ ॥

डीङः श्वयतेर् ईकारेतो विकल्पितेनश्च पत्यादिवर्जात् तयोर् इम् न स्यात्। डीनः। शूनः। दीप्तः। गूढः। हृतः। ततः। पत्यादेस्तु पतितः। दरिद्रितः। निष्कुषितः।

आदितः ॥ १०८ ॥

आकारेतस् तयोर् इम् न स्यात्। मिन्नः।

भावादिठे वा ॥ १०९ ॥

मिन्नं मेदितं तेन। प्रमिन्नः प्रमेदितः सः।

शकेर् ठे ॥ ११० ॥

शकितो ऽर्चितुं शिवस्तेन शक्तः।

क्षुब्धवाढस्वान्तध्वान्तफाण्टकष्टघुष्टलग्नम्लिष्टविरिब्धधृष्टविशस्तपरिवृढदृढधृतवृत्ताभ्यर्णाः ॥ १११ ॥

एते ठान्ता निपात्यन्ते। क्षुब्धो मन्थः। वाढं भृशम्। स्वान्तं मनः। ध्वान्तं तमः। फाण्टं कषायभेदः। कष्टं कृच्छ्रम्। घुष्टं शब्दितम्। लग्नं सक्तम्। म्लिष्टमस्पष्टम्। विरिब्धः स्वरः। धृष्टः प्रगल्भः। विशस्तः। परिवृढः प्रभुः। दृढो बली। धृतं पद्यम्। वृत्तो गुणश्छात्रेण। अभ्यर्णं समीपम्।

नेम् संनिव्यर्दः ॥ ११२ ॥

संनिविपूर्वाद् अर्देतेस् तयोर् इम् न स्यात्। समर्णः। न्यर्णः। व्यर्णः।

वा रुषामत्वरसंघुषास्वनः ॥ ११३ ॥

एत्यस् तयोर् इम् न स्याद्वा । हृष्टः । हृषितः । श्रान्तः । श्रमितः । कृष्टः । कृषितः । तूर्णः । त्वरितः । संघुष्टः । संघुषितः । आस्वान्तः । आस्वनितः ।

दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञता वा ॥ ११४ ॥

एते ज्यक्ताः क्तान्ता निपात्यन्ते वा । पक्षे दमितः । शमितः । पूरितः । दासितः । स्थाशितः । क्षादितः । ज्ञपितः ।

स्फायः स्फी वा ॥ ११५ ॥

स्फीतः । स्फीतवान् । स्फातः । स्फातवान्

प्यायो ऽगेः प्य् अस्वाङ्गे तु वा ॥ ११६ ॥

अगेः प्यायः पी स्यात्तयोः । स्वङ्गादन्यत्र तु वा स्यात् । पीनं मुखम् । पीनः प्यानः स्वेदः ।

आङो ऽन्यूधसोः ॥ ११७ ॥

आङः परस्य प्यायः पी स्यात्तयोरन्यूधसोः । आपीनो ऽन्युः । आपीनमूधः ।

ह्लादेः स्वः स्नौ च ॥ ११८ ॥

ह्लादेः स्वः स्यात्तयोः स्नौ च । प्रह्लस्नः ।

दोसोमास्थां डिस् त्य् अणौ ॥ ११९ ॥

एषां डिः स्याद् अणौ तकारे परे । दितः । सितः । मितः । स्थितः ।

क्षाशेर् वा ॥ १२० ॥

क्षितः । क्षातः । शितः । शातः ।

शो व्रते नित्यम् ॥ १२१ ॥

संशितं व्रतम् ।

धाजो क्तिः ॥ १२२ ॥

धाजो क्तिः स्याद् अणौ ते परे । क्तितः ।

चरफलो ऽद् उः ॥ १२३ ॥

अनयोर् अकार उः स्याद् अणौ ते । प्रफुल्लः ।

दद् दो ऽधः ॥ १२४ ॥

दासंज्ञकस्य धावर्जस्य दत् स्याद् अणौ ते । दत्तः । अधः किम् । धीतः ।

ग्यचस् त वा ॥ १२५ ॥

गेर् अचः परस्याधो दस् तो वा स्याद् अणौ ते । प्रत्तः । प्रदत्तः ।

र्घो दाते गीचः ॥ १२६ ॥

नीत्तम् । इचः किम् । प्रत्तम् । दाते किम् । निर्दत्तम् ।

जग्धो ऽदो यपि च ॥ १२७ ॥

अदो जग्धः स्याद् अणौ ते यपि च । जग्धः ।

घे चादिढे क्तः ॥ १२८ ॥

आदिढे विहितः क्तो घे स्याड् ढभावयोश्च । प्रकृतः कटं सः । प्रकृतः कटस्तेन । क्षे र्घ इति प्रक्षीणः सः । प्रक्षीणं प्रक्षितं तेन । क्षीणः क्षितो ऽयं तपस्वी । क्षीणायुः । क्षितायुः ।

गत्यर्थाढशीस्थासवसजनजॄश्लिषरुहः ॥ १२९ ॥

एभ्यो घे क्तः स्याड् ढभावयोश्च । गङ्गां गतः । कृष्णं प्राप्तः । शयितः । शेषमधिशयितो विष्णुः । वैकुण्ठमधिष्ठितः । शिवमुपासितः । हरिदिनमुपोषितः । राममनुजातो ऽच्युतः । विश्वमनुजीर्णो ऽनन्तः । लक्ष्मीमाश्लिष्टो मुकुन्दः । गरुडमधिरूढो गोविन्दः ।

ध्रौव्यगत्यदनार्थाड् डे च ॥ १३० ॥

निश्चलार्थाद् गत्यर्थाद् भोजनार्थाच्च क्तो डे स्याड् ढभावघेषु च ।

मुकुन्दस्यासितमिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥

ज्ञार्चेच्छार्थशीच्शीलादेः सति ॥ १३१ ॥

एभ्यो वर्तमाने क्तः स्यात् । विदितः । पूजितः । वाञ्छितः । इद्धः । शीलितः । शिवो ऽनुवर्तते ।

ठीपमवत् क्वसुकानौ ॥ १३२ ॥

धोर् एतौ क्रमाट् ठ्याः पमवत् स्तः । बभज्वान् । जजागर्वान् । जजागृवान् । दुद्यूवान् । दिदिवान् । विविश्वान् । विविच्छ्वान् ।

वसोर् घस्एकाज्र्इण्आत इम् ॥ १३३ ॥

घस एकाचो ऽर्तेर् इण आदन्ताच्च वसोर् इम् स्यात् । नान्यतः । जक्षिवान् । आदिवान् । आरिवान् । ईयिवान् । ददिवान् ।

ह्नगमदृशविशविन्दो वा ॥ १३४ ॥

एभ्यो वसोर् इम् स्याद्वा । जघ्निवान् । जघन्वान् । जग्मिवान् । जगन्वान् । ददृशिवान् । ददृश्वान् । विविशिवान् । विविश्वान् । विविदिवान् । विविद्वान् ।

दाश्वान् साह्वान् मीढ्वान् ॥ १३५ ॥

एते वस्वन्ता निपात्यन्ते ।

चक्राणः । जजागराणः । जजाग्राणः । अनूचानः ।

कीपमवच् शतृशानौ ॥ १३६ ॥

धोः शतृशानौ क्रमात् क्याः पमवत् तौ स्तः । पचन् ।

शाने ऽतो मन् ॥ १३७ ॥

अकारस्य मन् स्याच् शाने । पचमानः ।

य् आसो ऽस्य ॥ १३८ ॥

आसः परस्यास्य शानस्य आ ई स्यात् । आसीनः ।

वेत्तेः शतुः क्वसुर् वा ॥ १३९ ॥

विद्वान् । विदन् ।

शक्तिवयस्ताच्छील्ये शतुः शानः ॥ १४० ॥

शत्रुं निघ्नानः । कवचं बिभ्राणः । भोगं भुञ्जानः ।

तीपनवत् स्यतृस्यमानौ ॥ १४१ ॥

धोः स्यतृस्यमानौ क्रमात् त्याः पनवत् तौ स्तः । करिष्यन् । करिष्यमाणः ।

॥ इति क्तादिपादः ॥

ञिभ्राजभूसह्रुचचरवृतवृधप्रजनापत्रपालंकृनिराक्रुउद्मदपतपच इष्णुर् घे ॥१४२॥

एभ्य इष्णुः स्याद् घे । कारयिष्णुः । भ्राजिष्णुः । भविष्णुः । सह्रिष्णुः । रोचिष्णुः । चरिष्णुः । वर्तिष्णुः । वर्धिष्णुः । प्रजनिष्णुः । अपत्रपिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । उद्मदिष्णुः । उत्पतिष्णुः । उत्पचिष्णुः ।

ष्णुक् भूज्ञेः ॥ १४३ ॥

आभ्यां ष्णुक् स्याद् घे । भूष्णुः । जिष्णुः ।

ग्लाम्लास्थाक्षिपचपरिमृजः स्नुः ॥ १४४ ॥

एभ्यः स्नुः स्याद् घे । ग्लास्नुः । म्लास्नुः । स्थास्नुः । क्षेष्णुः । पक्ष्णुः । परिमार्क्ष्णुः ।

क्षिपत्रसगृधधृषः क्नुः ॥ १४५ ॥

एभ्यः क्नुः स्याद् घे । क्षिप्नुः । त्रस्नुः । गृध्नुः । धृष्णुः ।

शृस्थाभूकनगमह्नलपवृपपतपदो जुकः ॥ १४६ ॥

एभ्यो जुकः स्याद् घे । शारुकः । स्थायुकः । भावुकः । कामुकः । गामुकः । घातुकः । लापुकः । वर्षुकः । पातुकः । पादुकः ।

भिक्षजल्पकुट्टलुण्टवृञः पाकः ॥ १४७ ॥

एभ्यः पाकः स्याद् घे । भिक्षाकी । जल्पाकी । कुट्टाकी । लुण्टाकी । वराकी ।

पतिगृह्णिस्पृह्णिशीङ आलुः ॥ १४८ ॥

एभ्य आलुः स्याद् घे । पतयालुः । गृह्यालुः । स्पृह्यालुः । शयालुः ।
शतसदसिधेदो रुः ॥ १४९ ॥

एभ्यो रुः स्याद् घे । शत्रुः । सद्रुः । सेरुः । धारुः । दारुः ।
घसस्र्अदः क्मरः ॥ १५० ॥

एभ्यः क्मरः स्याद् घे । घस्मरः । सृमरः । अद्मरः ।
मिद्भासभन्जो घुरः ॥ १५१ ॥

एभ्यो घुरः स्याद् घे । मेदुरः । भासुरः । भङ्गुरः ।
छिद्भिद्विदः कुरः ॥ १५२ ॥

एभ्यः कुरः स्याद् घे । छिदुरः । भिदुरः । विदुरः ।
जागृयङुन्तयजजपवददन्श ऊकः ॥ १५३ ॥

एभ्य ऊकः स्याद् घे । जागरूकः । यायजूकः । जञ्जपूकः । वावदूकः ।
दन्दशूकः ।
यङुन्तचलपतसह्वह्वः किः ॥ १५४ ॥

एभ्यः किः स्याद् घे । चाचलिः । पापतिः । सासह्विः । वावह्विः ।
द्विश् चाद्र्उङ्लोपिनः ॥ १५५ ॥

आदन्ताद् ऋवर्णान्ताद् उङ्लोपिनश्च किः स्याद् घे । तेषां च द्वित्वम् ।
ददिः । चक्रिः । जग्मिः ।
यायायभासकसस्थेशपिशप्रमदो वरः ॥ १५६ ॥

यायावरः । भास्वरः । कस्वरः । स्थावरः । ईश्वरः । पेश्वरः । प्रमद्वरः ।
क्ष्वरप् सृजीण्नशगमस् त मश् च ॥ १५७ ॥

एभ्यः क्ष्वरप् स्याद् घे मस्य च तः । सृत्वरी । जित्वरी । इत्वरी । नश्व-
री । गत्वरी ।
ह्विन्सदीपकम्पाजसस्मिङ्कमनमो रः ॥ १५८ ॥

ह्विंस्रः । दीप्रः । कम्प्रः । अजस्रः । स्मेरः । कम्रः । नम्रः ।

सन्भिक्षाशन्स उः ॥ १५९ ॥

एभ्य उः स्याद् घे । रिप्सुः । भिक्षुः । आशंसुः ।

विन्द्विच्छू ॥ १६० ॥

एतौ निपात्यौ । वेत्तीति विन्दुः । इच्छतीति इच्छुः ।

